नित्यमत्रप्रकाशनस्त्वेपाख्यायोऽस्त्वितिरु: १९ अप्रमत्तांतरात्माप्रभवानिर्विशेषः २० २१ अनंतभोगैःफणाभिः २२ सहायमिति २३ २४ अध्यायः मातरितिपसतेव

इमांमहींशैलवनोपपन्नां ससागरग्रामविहारपत्तनां त्वंशेषसम्यक्चलितां यथावत्संगृह्यतिष्ठस्वयथाचलास्यात् १८ शेषश्च च यथाह
देवोवरदः प्रजापतिर्महीपतिर्भूतपतिर्जगत्पतिः तथामहींधारयितास्मि निश्चलां प्रयच्छतांमे शिरसिप्रजापते १९ ब्रह्मोवाच अधोमहींगच्छ
भुजंगमोत्तमस्वयंतवैषाविवरंप्रदास्यति इमांधरांधारयतात्वयाहिमेमहत्प्रियंशेषकृतंभविष्यति २० सौतिरु च तथेतिकृत्वाविवरंप्रविश्य
सः प्रभुर्भुवोभुजगवराग्रजः स्थितः बिभर्तिदेवींशिरसामहीमिमां समुद्रनेमिंपरिगृह्यसर्वतः २१ ब्रह्मो च शेषोऽसिनागोत्तमधर्मदेवोम
हीमिमांधारयसेयदेकः अनंतभोगैः परिगृह्यसर्वांयथाहमेवंबलभिद्यथावा २२ सौतिरु च अधोभूमौवसत्येवंनागोनन्तः प्रतापवा
न् धारयन्वसुधामेकः शासनाद्ब्रह्मणोविभुः २३ सुपर्णंचसखायंवैभगवानमरोत्तमः प्रादादनन्तायतदावैनतेयंपितामहः २४ इसा
विपर्वणिआस्तीके। सौतिरु च मातुः सकाशात्तंशापंश्रुत्वावैपन्नगोत्तमः वासुकिश्चिंतयामासशापोऽयंनभवेत्कथं १ ततः सम
त्रयामासभ्रातृभिः सहसर्वशः ऐरावतप्रभृतिभिः सर्वैर्धर्मपरायणैः २ वासुकिरु च ॥ ॥ ॥ ॥

शीक्रिपतेनगोत्तमेयेनसपन्नगोत्तमः अमृतमथनकालेमंदरंपरिवर्त्तयनवासुकिः पूर्वोक्तरूपंमातुः शापंश्रुत्वा २ ततः योगवले। नशरीरंतमादायसमंत्रयामास २ ॥

आ० ९२

अयंभावः मंथनव्याहृतेनागराजेप्रथमोसन्नमश्वंनिमित्तीक्षसकद्रूः पुत्रान्शशापतंचशापं [illegible] निवर्त्तयितंमंत्रपन्नसर्पयज्ञशापत्रेणतत्प्रतीकारोपायेउक्तेपिकार्यगौरवादप्रसयाद्याम
तमंथनांतेवास्त। किंर्ब्रह्माणांशरणंगतवान्तेनचएलापत्रोक्तमेवंवचनमुक्तासांत्वितः अतएवाथदेवासुराः सर्वेइत्यादिग्रिमाध्यायस्याविचारानंतरमप्यमृतमंथनकथासंगच्छते २ ३ अपि

अयंशापोयथोद्दिष्टोविदितंवस्तथानघाः तस्यशापस्यमोक्षार्थंमंत्रयित्वायतामहे ३ सर्वेषामेवशापानांप्रतिघातोहिविद्यते न
तुमात्राभिशप्तानांमोक्षः क्वचनविद्यते ४ अव्ययस्याप्रमेयस्यसत्यस्यचतथाग्रतः शप्ताइत्येवमेश्रुत्वाजायतेहृदिवेपथुः ५ नूनं
सर्वविनाशोयमस्माकंसमुपागतः नह्येतांसोव्ययोदेवः शपंतींप्रत्यषेधयत ६ तस्मात्संमंत्रयामोद्यभुजंगानामनामयं यथाभ
वेद्धिसर्वेषां मानः कालो[illegible]त्यगादयं सर्वएवहिनस्तावद्बुद्धिमन्तोविचक्षणाः अपिमंत्रयमाणाहिहेतुंपश्याममोक्षणे ८
यथानष्टंपुरादेवागूढमग्निंगुहागतं यथासयज्ञोनभवेद्यथावापिपराभवः जनमेजयस्यसर्पाणांविनाशकरणायवै ९ ॥ ॥

शप्तानांमात्राभिशप्तानां ४ सत्यस्यसत्यलोकपतेः अग्रतः अव्ययस्यजरामरणवर्जितस्य। अप्रमेयस्यअनंत[illegible]माहात्म्यस्य: ब्रह्मणोग्रेशप्ताइतिश्रुत्वा ५ सोव्ययोदेवोब्रह्मा ६ अना
मयंकुशलं। मानः कालोत्यगात। प्राक्तत्रारंभात्प्रतीकारः कर्तव्यइत्यर्थः ७ ८ अपीतियथागूढ: मग्निंमंत्रेणदेवाअपश्यनएवंमोक्षणेहेतुंपश्यामेत्यर्थः गुहा[illegible]गतंस्वकारणेवा
यौलीनंअतएवनष्टंअदर्शनंगतं ९ ॥ ॥ ॥ ॥ ॥ ॥ राम० ९२

जन्मेजयस्य यज्ञोपध्यानमेवेध्यथावा यज्ञस्य प्रभवः स्यात्तथा पश्यामेसनुसृज्यते। विनाशकरणापष्टहन्तइतिशेषः १० समयं कर्मसंमंत्रबुद्धिविशारदाः नीतिनिश्चयनिपुणाः ११ भिक्षामः याचा
महे १२ १३ निवर्त्स्यतिनिवृत्तोभविष्यति १४ प्रसदोषाः हिंसाकृतानरकाः इहदोषाः पुराणदृष्टं शादयः हेतुभिर्विप्रशापामोघत्वादिभिः कारणैस्तन्मूलैर्विप्रावज्ञादिभिः प्रदर्शि

सौतिरुवाच तथेत्युक्त्वा ततः सर्वे काद्रवेयाः समागताः समयं चक्रिरे तत्र मंत्रबुद्धिविशारदाः २० एके तत्राब्रुवन्नागा वयं भूत्वा द्विजर्षभाः जन
मेजयं तं भिक्षामो यज्ञस्ते न भवेदिति ११ अपरे त्वब्रुवन्नागास्तत्र पंडितमानिनः मंत्रिणोस्य वयं सर्वे भविष्यामः सुसंमताः १२ स नः प्रक्ष्यति स
र्वेषु कार्येष्वर्थविनिश्चयं तत्र बुद्धिं प्रदास्यामो यथा यज्ञो निवर्त्स्यति १३ स नो बहुमतान्राजा बुद्ध्वा बुद्धिमतां वरः यज्ञार्थं प्रक्ष्यति व्यक्तं ने
ति वक्ष्यामहे वयं १४ दर्शयंतो बहून्दोषान्प्रेत्य चेह च दारुणान् हेतुभिः कारणैश्चैव यथा यज्ञो भवेन्न सः १५ अथवा य उपाध्यायः क्रतौ त
स्य [illegible] भविष्यति सर्पसत्रविधानज्ञो राजकार्यहिते रतः १६ तं गत्वा दशतां कश्चिद्भुजंगः स मरिष्यति तस्मिन्मृते यज्ञकारे क्रतुः स न भविष्यति १७
ये चान्ये सर्पसत्रज्ञा भविष्यंत्यस्य ऋत्विजः तांश्च सर्वान्दशिष्यामः कृतमेवं भविष्यति १८ अपरे त्वब्रुवन्नागा धर्मात्मानो दयालवः अबुद्धिरेषा
भवतां ब्रह्महत्या न शोभनं १० सम्यक्सद्धर्ममूला वै व्यसने शांतिरुत्तमा अधर्मोत्तरता नाम कृत्स्नं व्यापादयेज्जगत् २१ अपरे त्वब्रुवन्नागाः
समिद्धं जातवेदसं वर्षैर्निर्वापयिष्यामो मेघा भूत्वा सविद्युतः २२ स्रुग्भांडं निशि गत्वा च अपरे भुजगोत्तमाः ॥ ॥ ॥ ॥

तमिति शेषः तथा च न सर्पस्यापराधाः स्तौ तिर्न्यायज्ञं निषेत्स्यामइत्यर्थः १५ २० सम्यगिति सम्यगविकल्पः सतां धर्मो देवब्राह्मणापायानां तन्मूला व्यसने आपदि शांतिः। आपत्राणः
इत्येकीभूय हसादोषोनेकलिंगादिवधेनमार्ज्यते वेत्ताव हो पापमार्जने कृत्स्नं जगद्वधः कर्त्तव्यो भविष्यतीसा हाधर्ममूले इत्यर्थः २१ २२ स्रुगादि यज्ञपात्रं ॥ ॥ ॥७

आ०
५३

प्रमत्तानांवा ग्राणां २३ २९ नोस्माकंनैष्ठिकीपायंतिकीरेक्षणमेवश्रव: श्रोत्रंयस्यतथाभूतवासुके ३० ३१ नैषेति।नमता।नसंमंतामममेतिशेषः ३२ किंतत्रेति श्रेयसापदिवा स्वत्वाणएवश

टी १

प २

प्रमत्तानांहृतंत्वस्य क्षिप्रमेवंभविष्यति २३ यज्ञेवाभुजगास्तस्मिन्शतशोथसहस्रशः जनान्दशंतुवैसर्वनिवंत्रासोभविष्यति २४ अथवासं
स्कृतंभोज्यंदूषयंतुभुजंगमाः स्वेनमूत्रपुरीषेणसर्वभोज्यविनाशिना २५ अपरेत्वब्रुवंस्तत्रऋत्विजोस्यभवामहे यज्ञविघ्नंकरिष्यामोदीयतांद
टा क्षिणेति २६ वश्यतांचगतोसौनः करिष्यतियथेप्सितं अपरेत्वब्रुवंस्तत्रजलेप्रक्रीडितंनृपं २७ गृहमानीयबध्नीमः क्रतुरेवंभवेन्नसः
अपरेत्वब्रुवंस्तत्रनागाः पंडितमानिनः २८ दशामस्तंप्रगृह्याशुकृतमेवंभविष्यति छिन्नंमूलमनर्थानांमृतेतस्मिन्भविष्यति २९ एषा
नोनैष्ठिकीबुद्धिः सर्वेषामीक्षणश्रवः अथयन्मन्यसेराजन्द्रुतंतत्संविधीयतां ३० इत्युक्त्वासमुदैक्षंतवासुकिंपन्नगोत्तमं वासुकिश्चा
पिसंचिंत्यतानुवाचभुजंगमान ३१ नैषावोनैष्ठिकीबुद्धिर्मताकर्तुंभुजंगमाः सर्वेषामेवमेबुद्धिः पन्नगानांनरोचते ३२ किंतत्रसंविधातव्यं
भवतांस्याद्धितंतुयत् श्रेयः प्रसादनंमन्येकश्यपस्यमहात्मनः ३३ ज्ञातिवर्गस्यसौहार्दादात्मनश्चभुजंगमाः नचजानातिमेबुद्धिः किंचि
त्कर्तुंवचोहिवः ३४ मयाहीदंविधातव्यंभवतांयद्धितंभवेत् अनेनाहंभृशंतप्येगुणदोषौमदाश्रयौ ३५ इत्यादिपर्वणिआस्तिके सौति
के च सर्पाणांवचः श्रुत्वासर्वेषामितिचेतिचवासुकेश्चवचः श्रुत्वाएलापत्रोब्रवीदिदं १ ॥ ॥ ॥ ॥ ॥

णीयइतिभावः ३३ मयेतिज्ञातिरक्षानाशनिमित्तौगुणदोषौमदाश्रयौतेषुश्रेष्ठत्वान्ममेत्यर्थः ३४ अध्यायः सर्पाणामिति।इतिचे तिचेतितत्तद्वचनाभिनयप्रदर्शनं १ ॥ ॥

आ०
५३

नीतृगा २
त्रिपर २

नेति भाविते वेसर्थः न तथाविधः यस्मात्पूर्वोक्तलिंगः सर्वविवादादृष्टः शकुंतात्मजस्तोन भवति मंत्रवीर्यसंपन्नत्वात् २ दैवेनेति। दृष्टदोषाभावेप्यागताविपन्नदृष्टोपायपरिहार्येसर्थः ३४ अहमिति
एगमेव कंठ्याकुलत्वात्समानार्थसंबोधनद्वयं। देवानां वचः समश्रौषमितिसंबंधः वचस्वाहतीक्ष्णाइतिशेषः एतत्समविशयंतीनां दक्षीणां दोषमालक्ष्य हा कष्टं कथं त्वीसंगीनां सत्त्वसंपादि

न स यज्ञो न भविता न ... वरराजा तथाविधः जनमेजयः पांडवेयो यतोस्माकं महद्भयं २ देवेनोपहतो राजन्यो भवेदिह पुरुषः सदैवमेवाश्रय
ते नान्यो स्तत्र परायणं ३ तदिदं दैवमस्माकं भयं पन्नगसत्तमाः दैवमेवाश्रयामोत्र श्रृणुध्वं च वचो मम ४ अहं शापे समुत्सृष्टे समश्रौषं वचस्त
दा मातुरुत्संगमारूढो भयात्पन्नगसत्तमाः ५ देवानां पन्नगश्रेष्ठास्तीक्ष्णास्तीक्ष्णा इति प्रभो पितामहमुपागम्य दुःखार्तानां महाद्युते ६ देवा
ऊचुः का हि लब्ध्वा प्रियान्पुत्रान् शपेदेवं पितामह ऋते कद्रूं तीक्ष्णरूपां देवदेव तवाग्रतः ७ तथेति च वचस्तस्यास्त्वयाप्युक्तं पितामह एतदिच्छाम
विज्ञातुं कारणं यन्न वारिता ८ ब्रह्मो च ९ बहवः पन्नगास्तीक्ष्णा घोररूपा विषोल्बणाः प्रजानां हित कामोहं न च वारितवांस्तदा ९ ये दंदशू
काः क्षुद्राश्च पापाचारा विषोल्बणाः तेषां विनाशो भविता न तु ये धर्मचारिणः १० यन्निमित्तं च भविता मोक्षस्तेषां महाभयात् पन्नगानां निबोधध्वं
तस्मिन्काले समागते ११ यायावरकुले धीमान्भविष्यति महानृषिः जरत्कारुरिति ख्यातस्तपस्वी नियतेंद्रियः १२ ॥ ॥ ॥

द्विति चिंतयाइः स्वार्त्तानां ६ ७ तथेति त्वयाप्येतन्नोपेक्षणीयमिति भावः ८ उपेक्षाकारणं ब्रह्मोवाच। बहव इति ९ दंदशूकाः दंशनशीलाः क्षुद्राः अल्पेपि निमित्ते प्राणापहारका
: पापाचाराः निर्निमित्तं हिंसकाः माता पिता विष्टान्हंति किमुतान्य इति भावः १० ११ १२ ॥ ॥

२५ स्वसा भगिनी मोक्ष्यति मोचयिष्यति १६ १७ अध्यायः एलापत्रेति १२ समतीत इवाभूत् शापात् प्राक् इत्यासक्तिः ततोपि प्राक् प्रवृत्तं मथनमनुवदति शापमोक्षोपायं

न स पुत्रो जरत्कारोर्भविष्यति तपोधनः आस्तीको नाम यज्ञं स प्रतिषेत्स्यति तं तदा १३ तत्र मोक्ष्यन्ति भुजगा ये भविष्यन्ति धार्मिकाः १३ देवा ऊचुः स मुनिप्रवरो ब्रह्मन्जरत्कारुर्महातपाः कस्यां पुत्रं महात्मानं जनयिष्यति वीर्यवान १५ वासुकेः सर्पराजस्य जरत्कारुः स्वसा किल तस्यां भविता पुत्रः शापान्नागांश्च मोक्ष्यति १६ एलापत्र उ० च एवमस्त्विति तं देवा पितामहमथाब्रुवन उक्त्वैवं वचनं देवान विरिंचिस्त्रिदिवं ययौ १७ सोहमेवं प्रपश्यामि वासुके भगिनीं तव जरत्कारुरिति ख्यातां तां तस्मै प्रतिपादय १८ भैक्षवद्भिक्षमाणाय नागानां भयशांतये ऋषये सुव्रतायैनामेष मोक्षः श्रुतो मया १९ इत्यादिपर्वणि आस्तीके सौतिरु० च एलापत्रवचः श्रुत्वा ते नागा द्विजसत्तम सर्वे प्रहृष्टमनसः साधु साध्वित्यथाब्रुवन् १ ततः प्रभृति तां कन्यां वासुकिः पर्यरक्षत जरत्कारुं स्वसारं वै परं हर्षमवाप च २ ततो नातिमहान्कालः समतीत इवाभवत् अथ देवासुराः सर्वे ममंथुर्वरुणालयं ३ तत्र नेत्रमभून्नागो वासुकिर्बलिनां वरः समाप्यैव च तत्कर्म पितामहमुपागमन ४ देवा वासुकिना सार्धं पितामहमथाब्रुवन् भगवंछापभीतोयं वासुकिस्तप्यते भृशं ५ अस्यैतन्मानसं शल्यं समुद्धर्तुं त्वमर्हसि जनन्याः शापजं देव ज्ञातीनां हितमिच्छतः ६ हितो ह्ययं सदास्माकं प्रियकारी च नागराट् प्रसादं कुरु देवेश शमयास्य मनोज्वरं ७ ब्रह्मोवाच मयैव तद्वितीर्णं वै वचनं मनसामराः एलापत्रेण नागेन यदस्याभिहितं पुरा ८

प्रदर्शितं अथेत्यादिना ३ ५ शल्यं शापजं ६ प्रियकारी प्रतिकल्पं नेत्रीभूय मथनोपयोगित्वात् ७ ८ ॥ ॥ ॥ ॥ ॥ ॥

जरत्कारौ जरत्कारुनिमित्तं तदन्वेषणायेत्यर्थः समादधत्स्थापकत्वेनियोजितवान् १३ अन्वेषणफलमाह जरत्कारुरिति १४ अध्यायः जरत्कारुरिति । जरत्कारुरिति । जरत्कारुनाम निर्वक्ति जरेति । जरत् । शब्दः क्षयवाची । कारुशब्दो दारुणवाची । तस्मात्तीक्ष्णपितः शरीरं कारुत्कोमात् वृद्धत्वमल्पत्वान्नदारुणमासीत् । तस्य तेन तपसा ह्रेपणां कृतमतो सौ जरत्कारुरित्यर्थः ३ वासुके

तत्कौरव्यैष नागेंद्रः प्राप्तकालं वचः स्वयं विनशिष्यंति ये पापा न तु ये धर्मचारिणः ९ उत्पन्नः स जरत्कारुस्तपस्युग्रे रतो द्विजः तस्यैष भगिनीं का
ले जरत्कारवे प्रयच्छतु १० एलापत्रेण यत्प्रोक्तं वचनं भुजगेन ह पन्नगानां हितं देवास्तत्तथा न तदन्यथा ११ सौतिरु च एतच्छ्रुत्वा ततो नागेंद्रः
पितामहवचस्तदा संदिश्य पन्नगान्सर्वान्वासुकिः शापमोहितः १२ स्वसारमुद्यम्य तदा जरत्कारुमृषिं प्रति सर्पान्बहून्जरत्कारौ नित्ययुक्तान्स
मादधत् १३ जरत्कारुर्यदा भार्यामिच्छेद्वरयितुं प्रभुः शीघ्रमेत्य तदाख्येयं तन्नः श्रेयो भविष्यति १४ इत्यादिपर्वण्यास्तीके शौनक उवाच ज
रत्कारुरिति ख्यातो यस्त्वया सूतनंदन इच्छामि तदहं श्रोतुं ऋषेस्तस्य महात्मनः १ किं कारणं जरत्कारोर्नामैतत्प्रथितं भुवि जरत्कारुनिरुक्तिं त्वं
यथावद्वक्तुमर्हसि २ सौतिरु च जरेति क्षयमाहुर्वै दारुणं कारुसंज्ञितं शरीरं कारु तस्यासीत्तत्स धीमान्शनैः शनैः ३ क्षपयामास तीव्रेण
तपसेत्यत उच्यते जरत्कारुरिति ब्रह्मन्वासुकेर्भगिनी तथा ४ एवमुक्तस्तु धर्मात्मा शौनकः प्राहसत्तदा उग्रश्रवसमामंत्र्य उपपन्नमिति ब्रुवन् ५ ॥

सु १

र्भगिनी तथेति तादृश्येव । अमर्तकापायवसाः शरीरक्षपणमेव श्रेयस्करमिति भावः ४ प्राहसत् अतिजीर्णयोरपि ब्रह्मचर्यविनाशः प्रसक्तः स्यादिति भावः आमंत्र्य हे उग्रश्रव इति संबोध्य
उपपन्नं युक्तं पद्धत्स्य वयोस्तयो विवाह इति भावः ५ ५ ५ ५ ५ ५ ५

आ०
९५

६ ७ ८ ९ सर्पसत्रकारणोवक्तुमाहततस्मादिना। ततोन्यास्केरवाणस्यनानंतरं अपरस्मिन्प्राप्तेलोकस्मिंश्चित्कालेनमंगलत्वान्नामाप्रयोवाचकलेतदादौसर्थः १० ११

शौनकउवाच उक्तंनामयथापूर्वंसर्वंतच्छ्रुतवानहं यथातुजातोह्यास्तीकएतदिच्छामिवेदितुं तच्छ्रुत्वास्यवचनंतस्यसूतः प्रोवाचशास्त्रतः सौतिरु
वाच संदिश्यपन्नगान्सर्वान्वासुकिः सुसमाहितः स्वसारमुद्यम्यतदाजरत्कारुमृषिंप्रति ८ अथकालस्यमहतः समुनिः संशितव्रतः तपस्यभि
रतोधीमान्सदारान्नाभ्यकांक्षत ९ सतूर्ध्वरेतास्तपसिप्रसक्तः स्वाध्यायवान्वीतभयः कृतात्मा चचारसर्वांपृथिवींमहात्मानचापिदारान्मन
साप्यकांक्षत ततोपरस्मिन्संप्राप्तेकालेकस्मिंश्चिदेवतु १० परीक्षिन्नामराजासीद्ब्रह्मन्कौरववंशजः १० यथापांडुर्महाबाहुर्धनुर्धरवरोयु
धि बभूवमृगयाशीलः पुरास्यप्रपितामहः ११ मृगान्विध्यन्वराहांश्चतरक्षून्महिषांस्तथा अन्यांश्चविविधान्वन्यांश्चचारपृथिवीपतिः १२
सकदाचिन्मृगंविद्ध्वाबाणेनानतपर्वणा पृष्ठतोधनुरादायससारगहनेवने १३ यथैवभगवान्रुद्रोविद्ध्वायज्ञमृगंदिवि अन्वगच्छद्धनुष्पाणि
: पर्यन्वेष्टुमितस्ततः १४ नहितेनमृगोविद्धोजीवन्गच्छतिवैवने पूर्वरूपंतुतत्तूर्णंसोगात्स्वर्गगतिंप्रति १५ परीक्षितोनरेंद्रस्यविद्धोयन्नष्ट
वान्मृगः दूरंचापहृतस्तेनमृगेणसमहीपतिः १६ परिश्रांतः पिपासार्त्तआससादमुनिंवनेगवांप्रचारेष्वासीनंवत्सानांमुखनिःसृतं १७ ॥

१३ १४ पूर्वरूपमिति। परिक्षिता तद्गतिस्वर्गगतिंप्रतिततमृगस्यादर्शनंपूर्वरूपसंकाशंसः राजान्वगात्प्रासनानंतनएवहस्तिनोभाद्याम् ठोराजाविप्रावमाननंतांशापमलभत्तांकृतवानिसर्थः
१५ १६ गवांप्रचारेष्वितिगोष्ठेषु १७ ॥ ॥ ॥ ॥ ॥ ए०
९५

उपयुंजानंभक्षयंतं १८ १९ २० समासज्जत्स्कंधेपयामास धनुःकोट्याधनुःप्रान्तेन २१ सराजेति। तंतथाभूतंदृष्ट्वासमाधिस्थंदृष्ट्वाक्रोधमुत्सृज्यव्यथितःसन्जगामनगरं। व्यथि
तेनापिसर्पोपमारणेनकृतं। दीर्घद्रोहित्वान्कृतंतस्यकिंचित्क्रोधोनुवर्ततइतिज्ञेयं यथोक्तंपौष्येकृत्रिपसवाक्यात्तानन्तान्हृदयमतीक्ष्णधारामिति २२ तदिदमुक्तंस्वधर्मनिरतमि

बा २

भूपिष्ठमुपयुंजानंफेनमापिबतांपयः तमभिद्रुत्यवेगेनसराजाशंसितव्रतं १८ अपृच्छद्धनुरुद्यम्यतंमुनिंक्षुच्छ्रमान्वितः भोभोब्रह्मन्नहंराजाप
रीक्षिदभिमन्युजः १९ मयाविद्धोमृगोनष्टःकच्चित्तंदृष्टवानसि समुनिस्तंतदानोवाचकिंचिन्मौनव्रतेस्थितः २० तस्यस्कंधेमृतंसर्पंक्रुद्धो
राजासमासजत् समुत्क्षिप्यधनुष्कोट्यासचैनंसमुपैक्षत २१ नसकिंचिदुवाचैनंशुभंवायदिवाशुभं सराजाक्रोधमुत्सृज्यव्यथितस्तंतथागतं
दृष्ट्वाजगामनगरमृषिस्त्वासीत्तथैवसः २२ नहितंराजशार्दूलंक्षमाशीलोमहामुनिः स्वधर्मनिरतंभूपंसमाक्षिप्तोप्यधर्षयत् २३ नहितंरा
जशार्दूलस्तथाधर्मपरायणं जानातिभरतश्रेष्ठस्ततस्तनमधर्षयत् २४ तरुणस्तस्यपुत्रोभूत्तिग्मतेजामहातपाः शृंगीनाममहाक्रोधोदुः
ष्प्रसादोमहाव्रतः २५ सदेवंपरमासीनंसर्वभूतहितेरतं ब्रह्माणमुपतस्थेवैकालेकालेसुसंयतः सतेनसमनुज्ञातोब्रह्मणागृहमेयिवान्
सख्योक्तःक्रीडमानेनसततंहसताकिल २७ संरंभात्कोपनोतीवविषकल्पोमुनेःसुतः उद्दिश्यपितरंतस्यश्रुत्वाचेषमाहरन् ऋषिपुत्रे
णामर्षिष्ठेकृशेनद्विजसत्तम २८ कृ ३ च तेजस्विनस्तवपितातथैवचतपस्विनः शवंस्कंधेनवहतिमांशृंगिन्गर्वितोभव २९

तेः स्वधर्मेरतोहात्तद्युपलंतन्निरतंज्ञातिस्वभावज्ञोमुनिःसमाक्षिप्तोपिनाधर्षयत। धृष्टत्वंकोपस्यनिग्रहधैर्यंचाकरोत २३ २७ सरंभातक्रोधावेशात। कोपनःतीक्ष्णः २८ २९

३० ३२ पित्राचेति। तन्न त्वद्धर्षणो विषये अनन्तरूपं कर्म अपराधान्तं तव पित्रा च न कृतं। येन तव पितृधर्षणो नाहं भृशं दुःखितोस्मि। आत्मनस्तु दृष्टान्तः विनापराधं तव पितृधर्षणां हं

व्याहरन्नृषिपुत्रेषु मास्म किंचिद्वचो वद अस्मद्विधेषु सिद्धेषु ब्रह्मवित्सु तपस्विषु ३० कृते पुरुषमानित्वं कृते वाचरत्तथाविधः दर्पज्ञाः पि
तरि दृष्टपरस्त्वं शवधरं तथा ३१ पित्रा चनन्व तत्कर्म नानुरूप मिवात्मनः कृतं मुनिकुलश्रेष्ठ येनाहं भृशदुःखितः ३२ इत्यादिपर्व आस्तीके
सौतिरुवाच एवमुक्तः स तेजस्वी शृंगी कोपसमन्वितः मृतधारं गुरुं श्रुत्वा पर्यतप्यत मन्युना १ स तं कृशमभिप्रेक्ष्य सत्यं तं वाचमुत्सृजन्
अपृच्छत्तं कथं तातः स मे घृततधारकः २ कृशउवाच राज्ञा परीक्षिता तात मृगयां परिधावता अवसक्तः पितुस्तेयमृतः स्कंधे भुजंगमः
शृंगीउवाच किं मे पित्रा कृतं तस्य राज्ञोनिष्टं दुरात्मनः ब्रूहि तत्कृश तत्त्वेन पश्य मे तपसो बलं कृशउवाच स राजा मृगयां यातः परीक्षिदभि
मन्युजः ससार मृगमेकाकी विद्ध्वा बाणेन शीघ्रगे ५ न चापश्यन्मृगं राजा चरंस्तस्मिन्महावने पितरं ते स दृष्ट्वैव पप्रच्छानभिभाषिणं ६
तं स्थाणुभूतं तिष्ठंतं क्षुत्पिपासाश्रमातुरः पुनः पुनर्मृगं नष्टं पप्रच्छ पितरं तव ७ स च मौनव्रतोपेतो नैव तं प्रत्यभाषत तस्य राजा धनुष्को
ट्या सर्पं स्कंधे समासृजत् ८ शृंगिंस्तव पिता सोपि तथैवास्ते यतव्रतः सोपि राजा स्वनगरं प्रस्थितो गजसाह्वयं ९ सौतिरुवाच एवमुक्त्वैवमृषि
उक्तः कृशवंशं स्कंधे प्रतिष्ठितं कोपसंरक्तनयनः प्रज्वलन्निव मन्युना १० ॥ ॥ ॥

स्वामसितर्धर्षणां हस्वामन्निधुर्धर्षणायेवाहं भृशं दुःखितोस्मीत्यर्थः ३३ अध्याय एवमुक्तेति मन्युनाक्रोधेन १ ५ अनभिभाषिणं मौनशीलं ६ नष्टं पलायनेनादृ गतं ७८
गजसाह्वयं हस्तिनापुरं ९ १० ॥ ॥ ॥ ॥ ॥

क्रोधवेगबलात्कृतः क्रोधावेशपरवशः ११ कृच्छ्रगतस्य मौनव्रतधरस्य राज्ञा चासौ किल्बिषी चेति राजकिल्बिषी १२ आशीविषः दंष्ट्राविषः १३ नेता नेष्यति १४ १९ विषये देशे २०

आविष्टः सद्यः कोपेन शशाप नृपतिं तदा वार्युपस्पृश्य तेजस्वी क्रोधवेगबलात्कृतः ११ शृं ३ च यो सौ वृद्धस्य तातस्य तथा कृच्छ्रगतस्य ह स्कंधे मृतं समास्रा
क्षीत्पन्नगं राजकिल्बिषी १२ तं पापमतिसंक्रुद्धः तक्षकः पन्नगेश्वरः आशीविषस्तिग्मतेजा मद्वाक्यबलचोदितः १३ सप्तरात्रादितो नेता यमस्य सदनं
प्रति द्विजानामवमंतारं कुरूणामयशस्करं १४ सोति ह च इति शप्त्वातिसंक्रुद्धः शृंगी पितरमभ्यगात् आसीनं गोव्रजे तस्मिन्वहंतं शवपन्नगं १५ स तं
मालक्ष्य पितरं शृंगी स्कंधगतेन वै शवेन भुजगेनासीद्भूयः क्रोधसमाकुलः १६ दुःखाच्चाश्रूणि मुमुचे पितरं चेदमब्रवीत् श्रुत्वेमां धर्षणां तात तव तेन दुरात्म न ४
ना १७ राज्ञा परीक्षिता कोपादशपं तमहं नृपं यथार्हति स एवोग्रं शापं कुरुकुलाधमः सप्तमेहनि तं पापं तक्षकः पन्नगोत्तमः १८ वैवस्वतस्य सदनं
नेता परमदारुणं तमब्रवीत्पिता ब्रह्मंस्तथा कोपसमन्वितं १९ श क ३ च न मे प्रियं कृतं तात नैष धर्मस्तपस्विनां वयं तस्य नरेंद्रस्य विषये निव
शामहे २० न्यायतो रक्षितास्तेन तस्य पापं न रोचये सर्वथा वर्तमानस्य राज्ञो ह्यस्मद्विधैः सदा २२ क्षंतव्यं पुत्र धर्मो हि हतो हंति न संशयः यदि राजा न सं
रक्षेत्पीडा नः परमा भवेत् २१ न शक्नुयाम चरितं धर्मं पुत्र यथासुखं रक्ष्यमाणा वयं तात राजभिर्धर्मदृष्टिभिः २३ ॥ ॥ ॥

तस्य पापं द्रोहं । सर्वथा अस्मास्वपराधेनापि वर्तमानस्य २१ हतो नाशितो धर्मो हंति सेव २२ धर्मेना शमेवाह यदिसादिना २३ २४ ॥ ॥ ॥ ॥

रा० ६

२४ राज्ञा परिरक्षिता रक्षितव्याः अस्य नाशे प्रजोच्छेदकृतं पापं न वेति भावः २५ वृतं अज्ञानतेति संबंधः २६ दोषाः दस्युपीडादयः जायंते निरुद्रवंति २७ २८ धारयन् कुर्वन् मनुष्याणां हि

सर्ग ४

चारो मे विपुलं धर्मं तेषां भागोस्ति धर्मतः सर्वथा वर्तमानस्य राज्ञः कृतयुगमेव हि २४ परिरक्षितविशेषेण यथा सप्त पितामहः रक्षसस्मांस्तथा राज्ञा रक्षितव्याः प्रजा विभो २५ तेनेह क्षुधितेनाद्य श्रांतेन च तपस्विना अज्ञानता कृतं मन्येव्रतमेतदिदं मम २६ अराजके जनपदे दोषा जायंति वै सदा उद्वृत्तं सततं लोकं राजा दंडेन शास्ति वै २७ दंडात् प्रतिभयं भूयः शांतिरुत्पद्यते तदा नोद्विग्नश्चरते धर्मं नोद्विग्नश्चरते क्रियां २८ राजा प्रतिष्ठितो धर्मो धर्मात् स्वर्गः प्रतिष्ठितः राज्ञो यज्ञक्रियाः सर्वा यज्ञाद्देवाः प्रतिष्ठिताः २९ देवाद् वृष्टिः प्रवर्तेत वृष्टेरोषधयः स्मृताः ओ
धि ५ षध्यो मनुष्याणां धारयन्सततं हितं ३० मनुष्याणां च यो धाता राजा राज्यकरः पुनः दशश्रोत्रियसमो राजा इत्येवं मनुरब्रवीत् ३१ तेने
ह क्षुधितेनाद्य श्रांतेन च तपस्विना अज्ञानता कृतं मन्येव्रतमेतदिदं मम ३२ कस्मादिदं त्वया वाल्यात् सहसा दुष्कृतं नरवृद्धीति नरपः शापमस्य तु ३३ सतः पुत्र सर्वथा ३३ इत्यादिपर्वणि आस्त्ये लोके परस्य च यद्येतन्मा सतातद्यदिवा दुष्कृतं कृतं प्रियं वाप्यप्रियं वा तेवाग्रक्तानम
याभवेत् १० नैवान्यथेदं भविता पितरेषब्रवीमि ते नाहं मृषा ब्रवीम्येवं स्वैरेष्वपि कुतः शपन् १ श क वाव जानाम्युग्रप्रभावं त्वां ता
त सत्यगिरं तथा नानृतं चोक्तपूर्वं ते नैतन्मिथ्या भविष्यति ३ पित्रा पुत्रो वयस्थोपि सततं वाच्य एव तु यथा स्याद्गुणसंयुक्तः प्राप्नुयाच्च महद्यशः ४
६४

संघाता पोषकः ३० श्रोत्रियो वेदाध्यायी अन्नकृराधिक्यमार्थं ३१ ३२ वाल्यात् अविवेकात् ३३ अस्याय: पद्यैनदिति १ स्वैरेष्वपि परीहासादिष्वपि २३ वयस्थोपि वीरोपि वाच्य: शास्य: राम०

६

टी १

श्रमवतां पोगैश्वर्ययुतां कोपो नीववर्द्धते ५ सचतपोनाशकः इति शिक्षणीय एवत्वं मयेत्याशयेनाह सोऽहमिति। बालत्वं विवेकशून्यतां साहसं आकस्मिकमकार्यकारित्वं पुत्रतां चावेक्ष्य त्वपिव
कव्यं उपदेश्यत्वं पश्यामि ६ सत्वमिति। क्रोधाहनने धर्महाससंवसर्थः ७ यतीनां आमुष्मिकहितार्थं यतमानानां ८ ९ ब्राह्मणः समनंतरा नवसात सन्नानक मम मक्तिप्रदानिस

टी २

किंपुनर्बालएव त्वं तपसा भावितः सदा वर्द्धते च प्रभवतां कोपोतीव महात्मनां ५ सोऽहं पश्यामि वक्तव्यं त्वपि धर्मभृतां वर पुत्रत्वं बालतां चै
वतवावेक्ष्य च साहसं ६ सत्वं शमपरो भूत्वा वन्यमाहारमाचरन् चरक्रोधमिहं हत्वा नैवं धर्मं प्रहास्यसि ७ क्रोधो हि धर्मं हरयति यतीनां दुःखसंचितं
ततो धर्मविहीनानां गतिरिष्टा न विद्यते ८ शम एव यतीनां हि क्षमिणां सिद्धिकारकः क्षमावतामयं लोकः पारश्चैव क्षमावतां ९ तस्माच्च
रेथाः सततं क्षमाशीलो जितेंद्रियः क्षमया प्राप्स्यसे लोकान् ब्रह्मणः समनंतरान् १० मया तु शममास्थाय यच्छक्यं कर्तुमद्य वै तत्करिष्या
म्यहं तात प्रेषयिष्ये नृपाय वै ११ मम पुत्रेण शप्तोसि बालेनाकृतबुद्धिना ममेमां धर्षणां त्वत्तः प्रेक्ष्य राजन्नमर्षिणा १२ सौतिरुवाच ए
वमादिश्य शिष्यं स प्रेषयामास सुव्रतः परिक्षिते नृपतये दयापन्नो महातपाः १३ संदिश्य कुशलप्रश्नं कार्यवृत्तांतमेव च । शिष्यं गौरमुखं
नाम शीलवंतं समाहितं १४ सोभिगम्य ततः शीघ्रं नरेंद्रं कुरुवर्द्धनं विवेश भवनं राज्ञः पूर्वं द्वास्थैर्निवेदितः १५ पूजितस्तु नरेंद्रेण द्वि
जो गौरमुखस्तदा आचख्यौ च परिश्रांतो राज्ञः सर्वमशेषतः शमीकवचनं घोरं यथोक्तं मंत्रिसन्निधौ १६ ॥ ॥ ॥

र्थः १० प्रेषयिष्ये संदेशहरमिति शेषः ११ १५ परिवर्जितैश्रमहीनः १६ ॥ छ ॥ छ ॥ छ ॥ छ॥

श्रा० ९६

१७ १८ न च क्रमेण हतं तवान् १९ तेन च पितरज्ञातं यथा स्यात्तथा शप्तोसि २० २२ यायं कृत्वैव पर्यतप्यत तन्नत्वमरलं कृत्वा २३ ब्राह्मणस्याज्ञातत्रापि मौनिनस्तत्रापि मपिद्यालोच

क्रो १ २४ लि १

गौरमुखस्तु च शमीको नाम राजेंद्र विषये वर्त्तते तव ऋषिः परमधर्मात्मा दांतः शांतो महातपाः १७ तस्य त्वया नरव्याघ्र सर्पः प्राणैर्वियोजितः १८
अवसक्तो धनु... ट्यास्कंधे मौनान्वितस्य च क्षांतवांस्तु स तत्कर्म पुत्रस्तस्य न चक्षमे १९ तेन शप्तो राजेंद्र पितुरज्ञातमद्य वै तक्षकः सप्तरात्रेण मृत्यु
स्तव भविष्यति २० तत्र रक्षां कुरुष्वेति पुनः पुनरथाब्रवीत तदन्यथा न शक्यं च कर्त्तुं केनचिदप्युत २१ न हि शक्नोति तं यंतुं पुत्रं कोपसमन्वि
तं ततोहं प्रेषितस्तेन तव राजन्हितार्थिना २२ सूत उ च इति श्रुत्वा वचो घोरं राजा कुरुनंदनः पर्यतप्यत तत्पापं कृत्वा राजा महातपाः २३
तं च मौनव्रतं श्रुत्वा वने मुनिवरं तदा भूय एवाभवद्राजा शोकसंतप्तमानसः २४ अनृशंस्यतां तस्य शमीकस्यावधार्य च पर्यतप्यत भूयोपि
कृत्वा तत्किल्बिषं मुनेः २५ न हि मृत्युं तथा राजा श्रुत्वा वै सोन्वतप्यत अशोचदमरप्रख्यो यथा कृत्वेह कर्म तत २६ ततस्तं प्रेषयामास राजा
गौरमुखं तदा भूयः प्रसादं भगवान करोत्विह मम ते तिवै २७ तस्मिंश्च गतमात्रेथ राजा गौरमुखे तदा मंत्रिभिर्मंत्रयामास सह संविग्नमानसः
२८ संमंत्र्य मंत्रिभिश्चैव स तथा मंत्रतत्ववित प्रासादं कारयामास एकस्तंभं सुरक्षितं २९ रक्षां च विदधे तत्र भिषजश्चौषधानि च ब्राह्मणान्मं
त्रसिद्धांश्च सर्वतो वै न्ययोजयत ३०

शोको ऽ जीवतस्तव ज्ञस्याहं तं चेत्यादिना। अनृशंस्यतां दयालुत्वं २५ २८ सर्वेन एवात्मानं गोपायेदिति शास्त्रादात्मरक्षार्थं यत्नं कृतवानित्याह प्रासादमित्यादिना २९ ३०॥ श्रा० ९६

३१ आतुरं प्रासादान्तरं न लभते द्रष्टुमपि न शक्नोति प्रासादं मितिपादेस्तंभं प्रासादमिति दुष्प्रवेशं राजसत्तमं राज्ञः समीचीनतमं ३२ चिकित्सितं निर्विषीकर्तुं ३३ ३४ अर्थसिद्धश्च भवि

राजकार्याणि तत्रस्थः सर्वाण्येवाकरोच्च सः मंत्रिभिः सह धर्मज्ञः समंतात्परिरक्षितः ३१ न चैनं कश्चिदारूढं लभते राजसत्तमं वातोपि निश्चरंस्तत्र
प्रवेशे विनिवार्यते ३२ प्राप्ते च दिवसे तस्मिन्सप्तमे द्विजसत्तमः काश्यपोऽभ्यागमद्विद्वांस्तं राजानं चिकित्सितुं ३३ श्रुतं हि तेन तदभूद्यथा तं राजस
त्तमं तक्षकः पन्नगश्रेष्ठो नेष्यते यमसादनं ३४ तं दष्टं पन्नगेंद्रेण करिष्येहमपज्वरं तत्र मेर्थश्च धर्मश्च भवितेति विचिंतयन् ३५ तं ददर्श स
नागेंद्रस्तक्षकः काश्यपं पथि गच्छंतमेकमनसं द्विजो भूत्वा वयोतिगः ३६ तमब्रवीत्पन्नगेंद्रः कश्यपं मुनिपुंगवं क्व भवांस्त्वरितो याति किं
च कार्यं चिकीर्षति ३६ काश्यप उ च नृपं कुरुकुलोत्पन्नं परीक्षितमरिंदमं तक्षकः पन्नगश्रेष्ठस्तेजसाद्य प्रधक्ष्यति ३८ तं दष्टं पन्नगें
द्रेणाते नाग्निसमतेजसं पांडवानां कुलकरं राजानममितौजसं गच्छामि त्वरितं सौम्य सद्यः कर्तुमपज्वरं ३९ तक्षक उ च अहं स त
क्षको ब्रह्मन्स्तं धक्ष्यामि महीपतिं निवर्त्तस्व न शक्तस्त्वं मया दष्टं चिकित्सितुं ४० काश्यप उ च अहं तं नृपतिं गत्वा त्वया दष्टमपज्वरं क
रिष्यामीति मे बुद्धिर्विद्याबलसमन्वितं ४१ इत्यादिपर्वण्यास्तीके

नाधर्मोपि सर्वलोकोपकारकस्य राज्ञो जीवनेन एतेन भस्यापि निष्कपटं महत्सेवां कुर्वतो धर्मसिद्धिरासीदिति ज्ञेयं ३५ ३६ ३७ ३८ ३९ ४० ४१ अध्यायः॥ ॥

आ० ५५

यद्दीति १ २ दशदंशंकुरु ३ ४ ५ नगं वृक्षं ६ १० नैतदस्ति द्विजश्रेष्ठ मन्त्रबलं विसर्वेशक्तिमतिब्रह्मीभूतोऽप्यतनुं तं न शक्ततिस्ति पाद्यपयाप्त्वेतार्थः ११ १२ श्रात्वं च मिलषि

प१

तक्षक उ चेद्दिदष्टं मयेह त्वं शक्तः किंचिच्चिकित्सितुं ततो वृक्षं मया दष्टमिमं जीवय काश्यप १ परं मन्त्रबलं यन्ते तद्दर्शय यतस्व च न्यग्रोधमे
नं धक्ष्यामि पश्यतस्ते द्विजोत्तम २ काश्यप उ च दशनागेन्द्र वृक्षं यद्येतदभिमन्यसे अहमेनं त्वया दष्टं जीवयिष्ये भुजंगम ३ सौतिरुवाच ए
वमुक्तः स नागेन्द्रः काश्यपेन महात्मना अदशद्वृक्षमभ्येत्य न्यग्रोधं पन्नगोत्तमः ४ स वृक्षस्तेन दष्टस्तु पन्नगेन महात्मना आशीविष
विषोपेतः प्रजज्वाल समंततः ५ तं दग्ध्वा स नगं नागः काश्यपं पुनरब्रवीत् कुरु यत्नं द्विजश्रेष्ठ जीवयैनं वनस्पतिं ६ सौतिरुवाच भस्मी
भूतं ततो वृक्षं पन्नगेन्द्रस्य तेजसा भस्म सर्वं समाहृत्य काश्यपो वाक्यमब्रवीत् ७ विद्याबलं पन्नगेन्द्र पश्य मेऽद्य वनस्पतौ अहं संजीवयाम्येनं
पश्यतस्ते भुजंगम ८ ततः स भगवान् विद्वान् काश्यपो द्विजसत्तमः भस्मराशीकृतं वृक्षं विद्यया समजीवयत् ९ अंकुरं कृतवांस्तत्र
तः पर्णद्वयान्वितं पलाशिनं शाखिनं च तथा विटपिनं पुनः १० दृष्ट्वा जीवितं वृक्षं काश्यपेन महात्मना उवाच तक्षको ब्रह्मन्नैतदत्यद्भुतं त्व
यि ११ द्विजेन्द्र यद्विषं हन्यां मम वा मद्विधस्य वा कं त्वमर्थमभिप्रेप्सुर्यासि तत्र तपोधन १२ यत्तेऽभिलषितं प्राप्तुं फलं तस्मान्नृपोत्तमा
त् अहमेव प्रदास्यामि तत्ते यद्यपि दुर्लभं १३ ॥ ॥ ॥ ॥ ॥

६१ तं ३

तं फलमिच्छ्वयः १३ श्रीकृष्णाय नमः ॥ ॥ ॥ ॥ ॥

एम० ५५

पृ१

घरमानस्तं मानस १४ निःस्वः एकाकिनाहतप्रमः १५ स्वापतेयं हिरण्यं स्वं धनं तस्य पतिः अग्निर्भुवद्रयिपती रयीणामिति लिंगात् रयिरिति धननाम । स्वपते रिदं स्वापतेयं । अग्नेयं वै हिरण्यमिति

२१

विप्रशापाभिभूते च कौरवाणामधिपे नराधिपे घरमाँस्ते विप्र सिद्धिः संशयिता भवेत् १४ ततो यशः प्रदीप्तं ते त्रिषु लोकेषु विश्रुतं । निःस्वः रविवद्भा
भुरं तर्हीन मितो व्रजेत् १५ काश्यपश्च धनार्थी यामहं तत्र तन्मे देहि भुजंगम ततोहं विनिवर्तिष्ये स्वापतेयं प्रगृह्य वै १६ तक्षकश्च या
वद्दत्तं प्रार्थयसे तस्मात् तावत्ततोऽधिकं अहमेव प्रदास्यामि निवर्तस्व द्विजोत्तम १७ सोतिष्ठच्च तक्षकस्य वचः श्रुत्वा काश्यपो द्विजसत्तमः प्र
दध्यौ स महातेजा राजानं प्रति बुद्धिमान् १८ दिव्यज्ञानः स तेजस्वी ज्ञात्वा तं नृपतिं तदा क्षीणायुषं पांडवेयमपावर्तत काश्यपः १९ लब्ध्वा
वित्तं मुनिवरस्तक्षकाद्यावदीप्सितं निवृत्ते काश्यपे तस्मिन्समयेन महात्मनि २० जगाम तक्षकस्तूर्णं नगरं नागसाह्वयं अथ शुश्राव गच्छन्स तक्ष
को जगतीपतिं २१ मंत्रैर्गदैर्विषहरै रक्षमाणं प्रयत्नतः २२ स तत्र च सचिंतयामास तदा मायायोगेन पार्थिवः मया वंचयितव्योसौ कश्च पायो
भवेदिति ततस्तापसरूपेण प्राहिणोत्स भुजंगमान् फलदर्भोदकं गृह्य राज्ञो नागोथ तक्षकः २३ तक्षकश्च वै गच्छध्वं यूयमव्यग्रा राजानं कार्य
वत्तया फलपुष्पोदकं नाम प्रतिग्राहयितुं नृपं २४

कृते स्वाद्व्यंवित्तं स्वापतेयमिसमरः २६ प्रदध्यौ ध्यानं चक्रे । राजानं प्रति राज्ञो मरणमुद्दिश्येत्यर्थः १८ १९ समयेन कालेन संकेत विशेषे [illegible]गसंवेषणो निवा २० २१ गदैः दंशस्थाने न्हो
णोत्की र्णैमर्द्यमानैरोषधविशेषैः २२ २४ ॥

ग॰१

२४ आपः आपः २५ तेषांकार्याणिपारितोषिकदानानि २६ २७ आदातंभक्षितं २९ विधिनादैवेननमेवतदेवः ३० ह्रस्वकः कुत्सितोह्रस्वः ३२ ३३ परिहृतंपरिहारःआ

सोतिस्त च तेनकृकसमादिष्टास्तथाचकुर्भुजंगमाः उपानिन्फलस्तथाराजेन्दर्मनापः फलानिच १५ तत्र्चसर्वेसराजेन्द्रःप्रतिजयाहवीर्यवान
कृत्वातेषांचकार्याणिगमनाभिमुखावभूतान २६ गतेषुतेषुनागेषुतापसन्नग्रहरूपिषु आमात्यान्कुतस्दस्तैवपोवाचमनसराधिपः २७भक्षयं
त्वभवंतोवैस्वादूनीमानिसर्वशः तापसैरूपनीतानिफलानिसद्धितामया २८ ततोराजासमसचिवः फलान्यादातुमैछत विधिनासंप्रयुक्तो
दैवऋषिवाक्येनतेनतु २९ यस्मिन्नेवफलेनागस्तमेवाभक्षयन्स्वयं ततोभक्षयतस्तस्यफलात्क्रमिभेदराम् ३० ह्रस्वकः कृष्णनयनस्ताम्र
वर्णोथशोनक सतंगृह्यनपश्रेष्ठः सचिवानिदमब्रवीत ३१ अस्तमभ्येतिसविताविषादद्यनमेभयं सत्यवागस्तसमुनिः कृमिर्मादश
तामयं ३२ तक्षकोनामभूत्वावैतथापरिहृतंभवेत तेचैनमनवर्त्ततमंत्रिणः कालचोदिताः ३३ एवमुक्त्वासराजेंद्रोग्रीवायांसंनिवेश्यवै
क्रिमिकंप्राहसन्नृणांमिमृत्युर्नष्टचेतसः ३४ स्म हसन्नेवभोगेनतक्षकेनत्ववेष्टत तस्मात्फलाद्विनिष्क्रम्ययत्तद्राज्ञेनिवेदितं ३५ वेष्टयित्वा
चवेगेननिनद्यचमहास्वनं अदशत्पृथिवीपालंतक्षकः पन्नगेश्वरः ३६ इत्यादिपर्वणिआस्तीके स्व च तेनथामंत्रिणोह
स्वाभोगेनपरिवेष्टितं विषण्णवदनाः सर्वेरुरुदुर्भृशदुःखिताः १

ब्राह्मणावमाननादोषस्वभवेत ३६ आध्यायःतेनथेति १ श्रीकृष्णायनमः ॥ ॥ ॥

२ सीमंतः स्त्रीणां द्विफालाबद्धेषु केशेषु मध्ये सिंदूररेखा तां कुर्वाणां पद्मवत् रक्तवर्णत्वात् आकाशस्य वनीलत्वात् ३० अशनिताडितो वज्राहत ४६ प्रथिता महेषुधिः ७ वपुष्टमा काशिराज कन्या
८ १० वांवाणीं पंप्रतीतरूपा हदृष्टपावनीतं प्रख्यातं रूपं सौंदर्यं यस्याः इति प्राभावेनानुरागातिशयेन ११ अनभमतमिष्टाकूतं मनोगयापदमापदं। विस्मृतो पिय द्रागाद्गान्तकमहृता

तं तु नादं ततः श्रुत्वा मंत्रिणस्ते प्रदुद्रुवुः अपश्यंत तथा यांतमाकाशेनागमहुतं २ सीमंतमिव कुर्वाणा नभसः पद्मवर्चसं तक्षकं पन्नगश्रेष्ठं भृ
शं शोकपरायणाः ३ ततस्तु ते तद्गृहमग्निना हृतं प्रदीप्यमानं विषजेन भोगिनः भयात्परित्यज्य दिशः प्रपेदिरे पपात राजाशनिताडितो यथा ४ त
तो नृपे तक्षकतेजसा हते प्रयुज्य सर्वाः परलोकसत्क्रियाः शुचिर्द्विजो राजपुरोहितस्तदा तथैव ते तस्य नृपस्य मंत्रिणः ५ नृपं शिशुं तस्य सुतं प्रचक्रिरे
समेत्य सर्वे पुरवासिनो जनाः नृपं यमाहुस्तममित्रघातिनं कुरुप्रवीरं जनमेजयं जनाः ६ स बाल एवार्यमतिर्नृपोत्तमः सहैव तैर्मंत्रिपुरोहितैस्तदा
शशास राज्यं कुरुपुंगवाग्रजो यथास्य वीरः प्रपितामहस्तथा ७ ततस्तु राजानममित्रतापनं समीक्ष्य ते तस्य नृपस्य मंत्रिणः सुवर्णवर्माणमुपेत्य का
शिपं वपुष्टमार्थं वरयांप्रचक्रमुः ८ ततः स राजा प्रददौ वपुष्टमां कुरुप्रवीराय परीक्ष्य धर्मतः स चापि तां प्राप्य मुदायुतोऽभवन्न चान्यनारीषु म
नो दधे क्वचित् ९ सरःसु फुल्लेषु वनेषु चैव प्रसन्नचेता विजहार वीर्यवान् तथा स राजन्यवरो विजह्निवान् यथोर्वशीं प्राप्य पुरा पुरूरवाः १०
वपुष्टमा चापि वरं पतिव्रता प्रतीतरूपा समवाप्य भूपतिं भावेन रामा रमयांबभूव तं विहारकालेष्ववरोधसुंदरी इत्यादिपर्वण्यास्तीके सूतऊचे च स
तस्मिन्नेव काले तु जरत्कारुर्महातपाः चचार पृथिवीं कृत्स्नां यत्रसायंगृहो मुनिः १ ॥ ॥ ॥ ॥

मितिरत्नगर्भः अध्यायः एतस्मिन्निति १ १ १ १ १ ॥ ३ ३ ॥

आ० १०१

२ ३ ४ स्वत्राणं स्वाङ्कं दीनरूपाः करुणापीडितत्वात् ५७ पतितारः पतिष्यथ ८ कृच्छ्रं दुःस्थां यथाऽऽपदं आपन्नान्प्राप्तान ९ १० ११ ततस्तपो द्विजेन्द्र स्मद्विपं

चरन्तीं क्षामदेहां तां जातुश्चरामहकतात्मभिः तीर्थयात्राप्रवनं कृत्वा पुराणेषु विचचार ह १ वायुभक्षो निराहारस्त्वशुष्यन्नहरहर्मुनिः स ददर्श पितॄन्नार्त्तैर्लम्बमा
नानधोमुखान् ३ एकतन्त्ववशिष्टे वै वीरणस्तम्बमाश्रितान् तं तन्तुं च शनैराखुमादन्तं विलेशयं ४ निराहारान्कृशान्दीनानार्त्तैस्त्राणमिच्छता
उपसृत्य स तान्दीनान्दीनरूपोऽभ्यभाषत ५ के भवन्तो वलम्बन्ते वीरणस्तम्बमाश्रिताः दुर्बलं खादितैर्मूलैराखुना बिलवासिना ६ वीरणस्तम्बके मूलं
यदप्येकमिह स्थितं तदप्ययं शनैराखुरादन्ते दशनैः शितैः ७ छेत्स्यतेऽल्पावशिष्टत्वादेतदप्यचिरादिव ततस्तु पतितारोऽत्र गर्त्ते ह्यस्मिन्नधोमुखा
: ८ तस्य मे दुःखमुत्पन्नं दृष्ट्वा युष्मानधोमुखान् कृच्छ्रमापदमापन्नान्प्रियं किं करवाणि वः ९ तपसोऽस्य चतुर्थेन तृतीयेनाथ वा पुनः अर्द्धेन वा
पि निस्तर्तुमापदं ब्रूत माचिरं १० अथवापि समग्रेण तरन्तु तपसा मम भवन्तः सर्व एवास्मात्काममेवं विधीयतां ११ पितर ऊचुः वृद्धो भवान्ब्रह्मचा
री यो नस्त्रातुमिहेच्छसि न तु विप्राग्र्य तपसा शक्यते तद्व्यपोहितुं १२ अस्ति नस्तात तपसः फलं प्रवदतां वर संतानप्रक्षयाद्ब्रह्मन्पतामनिर
येऽशुचौ संतानं हि परो धर्म एवमाह पितामहः लम्बतामिह नस्तात न ज्ञानं प्रतिभाति वै १४ येन त्वां नाभिजानीमो लोके विख्यातपौरुषं वृद्धो भवान्म
हाभागो यो नः शोच्यान्सुदुःखितान् १५ शोचते चैव कारुण्याच्छृणु ये वै वयं द्विज यायावरा नाम वयमृषयः संशितव्रताः १६ ॥ ॥

वा ४

कृच्छ्रं व्यपनेतुं १२ प्रवदतां प्रवक्तॄणां मध्यापकानां १३ ज्ञानं संज्ञा यया त्वां नाभिजानीमः मूर्छितकल्पाः स्मः इत्यर्थः १४ १६ ॥ ॥ ॥ एम० १०१

१८ स्मैयतात्मा जितचित्तः महात्मा महामतिः १९ कृच्छ्रं संकटं आपादिताः प्रापिताः नाथवन्नाथं स्वरतया २१ २३ २६ मंदात्मानं अदीर्घदर्शिनं अचेतसं यायावराणाम् २२ २८ २९

लोकात्पुण्यादिह भ्रष्टाः संतानप्रक्षयान्मुने प्रणाशं नरकपातान्न नहि नस्तं तरस्ती वै १७ अस्ति त्वेको हि नस्तंतुः सोऽपि नास्ति यथा तथा मंदभा
ग्योल्पभाग्यानां तप एकं समास्थितः १८ जरत्कारुरिति ख्यातो वेदवेदांगपारगः नि[illegible]तात्मा महात्मा च [illegible] सुव्रतः सुमहातपाः १९
तेन स्म तपसो लोभात्कृच्छ्रमापादिता वयं न तस्य भार्या पुत्रो वा बांधवो वास्ति कश्चन २० तस्मात्त्वं वामहे गर्त्ते नष्टसंज्ञाननाथवत् सवक्तव्यस्त्व
याद्रष्टाद्य अस्माकं नाथवत्तया २१ पितरस्ते वलवत्ते गर्त्ते दीनास्त्वधोमुखाः साधु दारान्कुरुष्वेति प्रजामुत्पादयेति च २२ कुलतंतुर्हि नः शिष्ट
स्त्वमेवैकस्तपोधन यत्त्वं पश्यसि नो ब्रह्मन्वीरणस्तंबमाश्रितान् २३ एषोऽस्माकं कुलस्तंब आस्ते स्वकुलवर्द्धनः यानि पश्यसि वै ब्रह्मन्मूला
नीहास्य वीरुधः २४ एतेन तंतवस्तात कालेन परिभक्षिताः यच्चैतत्पश्यसि ब्रह्मन्मूलमस्याईभक्षितं २५ यत्र लंबामहे गर्त्ते सोऽप्येकास्तप
आस्थितः यमाखुं पश्यसि ब्रह्मन्काल एष महाबलः स तं तपोरतं मंदं शनैः क्षपयते तदन २६ जरत्कारुं तंतयोल्लुब्धं मंदात्मानामचेतसं न
हि नस्तत्तपस्तस्य तारयिष्यति सत्तम २७ छिन्नमूलान्परिभ्रष्टान्कालोपहतचेतसः अधः प्रविष्टान्पश्यास्मान्यथा दुष्कृतिनस्तथा २८
अस्मासु पतितेष्वत्र सह सर्वैः सबांधवैः छिन्नः कालेन सोऽप्यत्र गंता वै नरकं ततः २९ ॥ ॥ ॥

श्रीरामोजयति ॥ ॥ ॥ ॥ ॥ ॥ ॥

आ०
१०२

अपरंहानादर्वाचीनं किंवज्जपाकरिष्यामोयेषांनोऽयमात्मायंलोकइतिश्रुतेः किमर्थावयमध्येष्यामहे किमर्थावयंयक्ष्यामहेवाचिहिप्राणंजुहुमइत्सादिश्रुतेश्चपिच[illegible]एमसानामेवेतिभावः
३० ३१ बांधवानांहितमिसार्द्धश्लोकः तस्मबांधवानामस्माकंसर्वेषांमध्येकस्त्वंयथात्मकुलंतथावंधुमिव अस्मानन्वनुशोचसितत्तस्मात्श्रोतुमिछामः कोभवानिहतिष्ठति

तपोवाप्यथवापत्नोपच्छामसावनंमहत् तत्सर्वमपरंतातनसंतत्समंमतं ३० तंतातहस्वाद्भयास्तंजरत्कारुंतपोधन यथाहष्टमिदंचात्रत्वया
ख्यपमशेषतः ३१ यथादंम्नकुर्यात्सपुत्रान्नमाद्येयथा तथाव्रवीस्त्वयावाच्यः सोस्माकंनाथवत्त्वया बांधवानांहितस्येहयथाचात्म
कुलंतथा कर्त्तव्यंधुमिवास्माकमनुशोचसिसत्तम श्रोतमिछामसर्वेषांकोभवानिहतिष्ठति ३२ इत्यादिपर्वण्यास्तीके सौतिरुवाच १
तच्छ्रुत्वाजरत्कारुर्भृशंशोकपरायणः उवाचतान्पितृनदुःखाद्बाष्पसंदिग्धयागिरा १ जरत्कारुरुवाच ममपूर्वेभवंतोवैपितरः सपितामहाः त
द्रूतयन्मयाकार्यंभवतांप्रियकाम्यया २ अहमेवजरत्कारुः किल्विषीभवतांसुतः तंदंडंधारयतमेदुष्कृतेरकृतात्मनः ३ पितरऊचुः पुत्रदि
ष्ट्यासिसंप्राप्तइमंदेशंयदृच्छया किमर्थंचत्वयाब्रह्मन्नकृतोदारसंग्रहः ४ जरत्कारुरुवाच ममायंपितरोनित्यंहृद्यर्थः परिवर्त्तते ऊर्ध्वरेताः श
रीरंवैप्रापयेयममुत्रवै ५ नदारान्वैकरिष्येहमितिमेभावितंमनः एवंदृष्ट्वातुभवतः शकुंतानिवलंवतः ६ मयानिवर्त्तितावुद्धिर्ब्रह्मचर्या
त्पितामहाः करिष्येवःप्रियंकामंनिवेक्ष्येहमसंशयं ७

नियोजनात् ३३ अध्यायः एतदिति १२ उद्राकृतिर्यस्यतस्यऋतेः ३ दिष्ट्याभाग्येन ५ भावितंभावयुक्तं ६ निवेक्ष्येनिवेशंविवाहंकरिष्ये ७ ॥ ॥ ॥ आ०
१०२

नमरेयंधारणायोषरोनकुर्या १९ शाश्वताः निसाः स्वअयाः स्वपर्हम्मस्ताः २० १२ यायामिपाये १८ २८ जात्कारौसमाहिताः जात्कारोरन्वेषणोयन्नाः १९ १९ ॥ ॥

सनाम्नीयघहंकन्याप्रपलस्येकदाचन भविष्यतिचयाकाचिद्दैन्यवत्त्वमुपगता ८ प्रतिग्रहीतातामस्मिन्नर्थेपंचयामहं एवंविधमहंकुर्यां
निवेशंशाष्वयांपदि १९ अन्यथानकरिष्येहंसत्यमेतत्पितामहाः तत्रचोत्पत्स्यतेजंतुर्भवतांतारणायवै शास्वतास्वाव्ययास्चैवतिष्ठंतुपितरो
मम २० सूत३ च एवमुक्तात्मपितॄंश्चचारपृथिवींमुनिः नचस्मलभतेभार्यांवृद्धोयमितिशौनक २१ यदानिर्वेदमापन्नः पितृभिश्चो
दितस्तथा तदारण्यंसगत्वोच्चैश्चुक्रोशभृशदुःखितः २२ सत्वारण्यगतः प्राज्ञः पितॄणांहितकाम्यया उवाचकन्यांयाचामितिस्त्रोवाचः श
नैरिमाः २३ यानिभूतानिसंतीहस्थावराणिचराणिच अंतर्हितानिवायानितानिश्रृण्वंतुमेवचः २४ उग्रेतपसिवर्त्तंतं पितरश्चोदयंतिमां
निविशस्वेतिदुःखार्त्ताः संतानस्यचिकीर्षया २५ निवेशायाखिलांभूमिंकन्याभैक्ष्यंचरामिभोः दरिद्रोदुःखशीलश्चपितृभिः सन्नियोजि
तः २६ यस्यकन्यास्तिभूतस्ययेमयेहप्रकीर्त्तिताः तेमेकन्यांप्रयच्छंतुचरतः सर्वतोदिशं २७ ममकन्यासनाम्नीयाभैक्ष्यवच्चोद्यताभवेत
भर्येचैवयांनाहंतांमेकन्यांप्रयच्छत २८ ततस्तेपन्नगायेवैजरत्कारौसमाहिताः तामादायप्रवृत्तिंतेवासुकेः प्रत्यवेदयन् २९ तेषां
श्रुत्वासनागेन्द्रस्तांकन्यांसमलंकृतां प्रगृह्यारण्यमगमत्समीपंतस्यपन्नगः ३० तत्रतांभैक्ष्यवत्कन्यांप्रादात्तस्मैमहात्मने नागेन्द्रोवासु
किर्ब्रह्मन्ननुतांप्रत्यगृह्णात ३१ ॥ ॥ ॥ ॥

असनामेतिमोहे स्थितस्यपरिग्रहेऽः स्वायेतिपितृप्रयोजनमात्रंकार्यमिसाशयः २३ २४ अध्यायः वासुकिरिति प्रतीच्छ प्रतिगृहाण २६ सर्वविद्वमूल्यंतनुकायास्तांतेनसंपृतं ७

असनामेतिवैमत्वाभरणीयाः विचारिते मोक्षभावे स्थितस्यापि द्वंद्वीभूतः परिग्रहे २२ ततो नाम स कन्यायाः पप्रच्छ भृगुनंदन वासुकिं भरणीयां वा
स्यान्न कुर्यामित्युवाच ह २३ इत्यादिपर्वण्यास्तीके सौतिरुच वासुकिस्त्वब्रवीद्वाक्यं जरत्कारुमृषिं तदा सनाम्नी तव कन्येयं स्वसा मे तपसान्वि
ता १ भरिष्यामि च ते भार्यां प्रतीच्छेमां द्विजोत्तम रक्षणं च करिष्येऽस्याः सर्वशक्त्या तपोधन २ त्वदर्थं रक्ष्यते चैषा मया मुनिवरोत्तम २ ऋ स
च न भरिष्येऽहमेतां वै एष वै समयः कृतः अप्रियं च न कर्तव्यं कृते चैनां त्यजाम्यहं ३ सौतिरुच प्रतिश्रुते तु नागेन भरिष्ये भगिनीमिति जरत्का
रुस्तदा वेश्म भुजगस्य जगाम ह ४ तत्र मंत्रविदां श्रेष्ठस्तपोवृद्धो महाव्रतः जग्राह पाणिं धर्मात्मा विधिमंत्रैः पुरस्कृतं ५ ततो वासगृहं रम्यं पन्नगेंद्रस
संमतं जगाम भार्यामादाय स्तूयमानो महर्षिभिः ६ शयनं तत्र संक्लृप्तं स्पर्ध्यास्तरणसंवृतं तत्र भार्यासहायो वै जरत्कारुरुवास ह ७ स तत्र सम
यंचक्रे भार्यया सह सत्तम विप्रियं मे न कर्तव्यं न च वाच्यं कदाचन ८ त्यजेयं विप्रिये च त्वां कृते वासं च ते गृहे एतद्गृहाण वचनं मया यत्समुदीरितं ९
ततः परमसंविग्ना स्वसा नागपतेस्तदा अतिदुःखान्विता वाक्यं तमुवाचैवमस्त्विति १० ॥ ॥ ॥ ॥

८ विप्रियेकृतेत्वांत्यजेयंदेवासंचसत्यजेयं ९ १० १० ॥ ॥ ॥ ॥

दुःखशीलं दुःखप्रदस्वभावं। श्वेतकाकीयैः स्वाचरणैश्च काकश्च श्वेनयामिमे श्वेतकाकीयास्तैः नित्यजागरूकत्वमपवक्रितत्वं भीतत्वं तैः उपाचरत्त्वाराधितवती। एतः कर्बुरस्त्वागतेश्तिमे दिनो कोशाहर्णावाऽपि एत
शब्दस्तद्धितिमद्गोवर्त्तनेशो गादिपदवत्। श्वेतश्चासौ काकश्च मा रोश्वेतिपरूपं अन्येत श्वेतकाकोवकस्तदीपैः तेहिवर्षास्तनीशस्थंवाकिंवपुष्मानितहृदिति १२ १४ उत्संगेऽङ्के १५ १६ दुःखशीलो दुःः

तथैव साच भर्त्तारं दुःखशीलमुपाचरत उपायैः श्वेतकाकीयैः प्रियकामा यशस्विनि १२ अतकालेततः स्नाता कदाचिद्भार्गवकेः स्व[illegible]सा
वै भर्त्तारं यथान्यायमुपतस्थे महामुनिं तत्रतस्याः समभवद्गर्भो ज्वलनसंनिभः अतीवतेजसायुक्तो वैश्वानरसमद्युतिः १३ शुक्लपक्षे यथा सो
मो व्यवर्द्धत तथैव सः ततः क[illegible]तिपयाहस्यजरत्कारुर्महायशाः १४ उत्संगेऽस्याः शिरः कृत्वा सुष्वाप परिखिन्नवत् तस्मिंश्च सुप्ते विप्रेन्द्रे सवितास्त
मियाद्गिरिं १५ अह्नःपरिक्षये ब्रह्मंस्ततः साऽचिन्तयत्तदा वासुकेर्भगिनी भीताधर्मलोपान्मनस्विनी। किंनुमे सुकृतं भूयाद्भर्तुरुत्थापनं नवा दुःखशी न४
लो हि धर्मात्मा कथं नास्यापराध्नुयां १७ कोपो वा धर्मशीलस्य धर्मलोपोऽथवा पुनः धर्मलोपो गरीयान्वै स्यादित्यत्राकरोन्मतिं १८ उत्थापयिष्ये
य[illegible]द्येनं ध्रुवं कोपं करिष्यति धर्मलोपो भवेदस्य संध्यातिक्रमणे ध्रुवं १९ इति निश्चित्य मनसा जरत्कारुर्भुजंगमा तमृषिं दीप्ततपसं शयानमन
लोपमं २० उवाचेदं वचः श्लक्ष्णं ततो मधुरभाषिणी उत्तिष्ठ त्वं महाभाग सूर्योऽस्तमुपगच्छति २१ ॥ ॥ ॥ ॥
पया २

खप्रदशीलः धर्मात्मा च कथं केन प्रकारेणापराधिनी न भवेयमित्यर्थः १७ कर्त्तव्य कोऽत्र हि द्वयमुपन्यस्य धर्मलोपमेवगुरुतरं करोति कोपो वेति १९ २१ ॥ ॥ ॥

प्रादुष्कृतः अग्निहोत्रो वह्निर्यस्मिन्स प्रादुष्कृताग्निहोत्रः अग्निहोत्रोऽग्निहविषोरिति मेदिनी। रम्यो धर्मसाधनत्वात् दारुणो भूतादिप्रचारात् २२ २४ विभावसोः सूर्यस्य २५ २६ ३० मिथः

संध्यामुपास्व भगवन्नपः स्पृष्ट्वा यतव्रतः प्रादुःष्कृताग्निहोत्रोऽयं मुहूर्त्तो रम्यदारुणः २२ संध्या प्रवर्त्तते चेयं पश्चिमस्यां दिशि प्रभो एवमुक्तः स भगवाञ्जरत्कारु
र्महातपाः २३ भार्यां प्रस्फुरमाणोष्ठ इदं वचनमब्रवीत् अवमानः प्रयुक्तोऽयं त्वया मम भुजंगमे २४ समीपे ते न वत्स्यामि गमिष्यामि यथागतं शक्तिरस्ति न
वामोरु मयि सुप्ते विभावसोः २५ अस्तं गंतुं यथाकालमिति मे हृदि वर्त्तते न चाप्यवमतस्येह वासो रोचेत कस्यचित् २६ किं पुनर्धर्मशीलस्य मम वा मद्विधस्य
वा एवमुक्ता जरत्कारुर्भर्त्रा हृदयकंपनं २७ अब्रवीद्भगिनी तत्र वासुकेः सन्निवेशने नावमानात्कृतवती तवाहं विप्र बोधनं २८ धर्मलोपो न ते विप्र
स्यादित्येतन्मया कृतं उवाच भार्यामित्युक्तो जरत्कारुर्महातपाः २९ ऋषिः कोपसमाविष्टस्त्यक्तुकामो भुजंगमां न मे वागनृतं प्राह गमिष्येऽहं भुजंगमे
३० समयो ह्येष मे पूर्वं त्वया सह मिथः कृतः सुखमस्म्युषितो भद्रे ब्रूयास्त्वं भ्रातरं शुभे ३१ इतो मयि गते भीरु गतः स भगवानिति त्वं चापि मयि निष्क्रां
ते न शोकं कर्त्तुमर्हसि ३२ इत्युक्ता साऽनवद्यांगी प्रत्युवाच मुनिं तदा जरत्कारुं जरत्कारुश्चिंताशोकपरायणा ३३ बाष्पगद्गदया वाचा मुखेन परिशुष्य
ता कृतांजलिर्वरारोहा पर्यश्रुनयना ततः ३४ धैर्यमालंब्य वामोरुर्हृदयेन प्रवेपता न मामर्हसि धर्मज्ञ परित्यक्तुमनागसं ३५ ॥ ॥

अनागसं ३२ चिंता ध्यातकार्यविषयिणी शोकोऽभर्तृवियोगजः ३५ ॥ ॥ ॥ ॥ ॥ ॥ ॥

३८ संप्रयोगः संबंधः मोघो निष्फलः ३९ ४३ अथायः गतमात्रमिति १५ अचूचुदं कार्यमिति द्विवचनं ६

नु ४

धर्मैस्थितां स्थितां धर्मेतदापि परिहितं रतां भगिनेकारणं यन्नमनसुमं द्विजोत्तम ३६ नदत्तं त्वत्तो मेदा किं मां वक्ष्यति वासुकिः मातृशा
पाभिभूतानां ज्ञातीनां मम सत्तम ३७ अपत्यमीप्सितं तत्तु तत्त्वता वक्तुदृश्यसे तत्तेपत्यलाभेन ज्ञातीनां मे शिवं भवेत् ३८ संप्रयोगा
भवेत्त्रायं मम मोघ तपादि ज ज्ञातीनां हितमिच्छतो भगवंस्त्वां प्रसादये ३९ इममप्यत्कं रूपं मे गर्भमाधाय सत्तम कथं मत्का महात्मा सन्नोतुमि
च्छसि नागम ४० एवमुक्तः स मुनिर्भार्यां वचनमब्रवीत् यद्वक्तुमनुरू[illegible]
पं च जरत्कारुं तपोधनः ४१ अस्त्ययं सुभगे गर्भस्तव वैश्वानरोपमः ऋषिः परमधर्मात्मा वेदवेदांगपारगः ४२ एवमुक्त्वा स धर्मात्मा जरत्कारुर्म
हानृषिः उग्राय तपसे भूयो जगाम कृतनिश्चयः ४३ इति श्रीमहाभारते आदिपर्वणि आस्तीके सौतिरुवाच गतमात्रं तु भर्तारं जरत्कारुरवेदयत्
भ्रातुः सकाशमागम्य याथातथ्यं तपोधन १ ततः स भुजगश्रेष्ठः श्रुत्वा सुमहदप्रियं उवाच भगिनीं दीनां तदा दीनतरः स्वयं २ वासुकि
रु व जानासि भद्रे यत्कार्यं प्रदाने कारणं च यत् पन्नगानां हितार्थाय पुत्रस्ते स्यात्ततोपरि ३ स सर्पसत्रात्किल नो मोक्षयिष्यति वीर्यवान्
एवं पितामहः पूर्वमुक्तवान्सुरैः सह अप्यस्ति गर्भः सुभगे तस्मान्मे मुनिसत्तमात् न चेच्छाम्य फलं तस्य दानकर्म मनीषिणः ५ का
मं च मम न माप्यं प्रष्टुं त्वां कार्यमीदृशं किं तु कार्यगरीयस्त्वात्ततस्त्वाहमचूचुदं ६ प्रेरितवान् ६

आ०
१०५

७ ८ जरत्कारुस्ततो वाक्यमित्युक्तः प्रत्यभाषतेति वाक्यं वचनीयमवाच्यमित्यर्थः इत्युक्तः प्रत्यभाषत गुरुवचनारंभेऽपि वचनं कार्यमेवेति पश्चात्तं देशं वदति यथोक्तं तु

फ३१

दुर्वाच्यं तद्विदित्वा च मनुस्ते तितपस्विनः नैनमत्रागमिष्यामि कदाचिद्धि शयेत्तमां ७ आवल्मं देहं मतुल्तं सर्वमेव विविशितं उ[illegible] सत्यशसं मे घोरं

महा३ हृदि विपरिस्थितं ८ जरत्कारुस्ततो वाक्यमित्युक्तः प्रत्यभाषत अश्वासयंती भर्तारं वासुकिं पन्नगेश्वरं ९ जरत्कारु वाच पृष्टो मया प्रस्थाने हेतोः स

महात्मा तपाः अस्तीत्युक्त्वा समुद्दिश्य ममेदं गतवांश्च सः १० स्वैरेष्वपि न ते नाहं स्मरामि वितथं वचः उक्तपूर्वं कुतो राजन्सांपराये स वक्ष्यति ११

न संतापस्त्वया कार्यः कार्यं प्रति भुजंगमे उत्पत्स्यति च ते पुत्रो ज्वलनार्कसमप्रभः १२ इत्युक्त्वा स हि मां भ्रातर्गतो भर्ता तपोधनः तस्माद्व्ये

तु परं दुःखं तव चेदं मनसि स्थितं १३ सौतिरुवाच एतच्छ्रुत्वा स नागेंद्रो वासुकिः परया मुदा एवमस्त्विति तद्वाक्यं भगिन्याः प्रत्य[illegible]त

१४ सांत्वमानार्थदानैश्च पूजया चानुरूपया सोदर्यां पूजयामास स्वसारं पन्नगोत्तमः १५ ततः प्रववृधे गर्भो महातेजा महाप्रभः य

था सोमो द्विजश्रेष्ठ शुक्लपक्षोदितो दिवि १६ अथ काले तु सा ब्रह्मन्प्रजज्ञे भुजगस्वसा कुमारं देवगर्भाभं पितृमातृभयापहं १७

ववृधे स तु तत्रैव नागराजनिवेशने वेदांश्चाधिजगे सांगान्भार्गवाच्च्यवनात्मुने १८

तथैव तन्नेदं स्ववचनमुक्त्वा अथ वाक्यविशारदः चकारार्थस्य कर्मेन नमेदातीरमाश्रिनशीति ९ ममेदं कार्यमुद्दिश्य अस्तीत्युक्त्वा इदं गतवानिति शेषः १० वितथं तेन उक्तपूर्वं न स्म

वाक्य१ रामि सांपराये संकटे सांपरायो रणापदोरिति कोशः ११ १६ प्रजज्ञे जनयामास १७ १८ राम०
१०५

फ२

उद्धिः कार्यनिष्ठासत्वगुणाइतिसत्वकार्याणिधर्मज्ञानवैराग्येश्वर्याणितैरन्वितः ९ १० ११ हिरण्मयः दीप्तिमान् १२ अध्यायः सर्पसत्रंप्रस्तावयन्शौनकआवायपेटच्छदिति १ ति

वीर्यवान्व्रतोवालएववुद्धिसत्वगुणान्वितः नामवास्यामवतख्यातंलोकेष्वास्तीकइत्युत ९ अस्तीत्युक्त्वागतोयस्मात्पितागर्भस्थएवतं वनंतस्मा
दिदंतस्यनामास्तीकेतिविश्रुतं १० सवालएवतत्रस्थ[illegible]स्वरन्नमितवुद्धिमान् गृहेपन्नगराजस्यप्रयत्नात्परिरक्षितः ११ भगवानिवदेवेशः
शूलपाणिः हिरण्मयः विवर्द्धमानः सर्वांस्तान्पन्नगानभ्यहर्षयत् १२ इत्यादिपर्वेआस्तीके सौनकउवाच यदपृच्छत्तदाराजामंत्रि
णोजनमेजयः पितुः स्वर्गगतिंतन्मेविस्तरेणपुनर्वद १ सौतिरुवाच शृणुब्रह्मन्यथापृच्छन्मंत्रिणोनृपतिस्तदा यथाचा
ख्यातवंतस्तेनिधनंतंपरीक्षितः २ जनमेजयउवाच जानंतिस्मभवंतस्तद्यथावृत्तंपितुर्मम आ[illegible]सीद्यथासनिधनंगतः काले
महाय[illegible] ३ श्रुत्वाभवत्सकाशाद्धिपितुर्वृत्तमशेषतः कल्याणंप्रतिपत्स्यामिविपरीतंनजातुचित् ४ सौतिरुवाच॥ मंत्रिणोथा
ब्रुवन्वाक्यंपृष्टास्तेनमहात्मना सर्वधर्मविदः प्राज्ञाराजानंजनमेजयं ५ मंत्रिणऊचुः शृणुपार्थिवयद्ब्रूषेपितुस्तवमहात्मनः च
रितंपार्थिवेंद्रस्ययथानिधनंगतः ६ धर्मात्माचमहात्माचप्रजापालःपितातव आसीदिहयथावृत्तः समहात्माशृणुष्व
तत् ७ ॥ ॥ ॥ ॥

धनंमरणं २ ३ कल्याणंसर्वलोकहितंचेत्प्रतिपत्स्यामिप्रतीकारं[illegible]करिष्यामिनान्यथेत्यर्थः ४ ५ ब्रूषेपृच्छसिनिधनंसमाप्तिं ६ महात्माउदारचित्तोमहानुभावः का
लिनियाहकत्वात् ७ ॥ ॥

चातुर्वर्ण्यं स्वधर्मस्थं चतुरो वर्णानि ३ १० स्वधिष्ठिताः सम्यक्पालिताः वनायपोषितवान् ११ १२ शारद्वतस्य कृपाचार्यस्य १३ सोन्नाययामिनि पादपूरणार्थः संधिः अजीजनत जातः
रा० १०६
१४ राजधर्मार्थः तस्यार्थः फलं तदुक्तानुष्ठानं शास्त्रभावनायां प्रवृत्तेरेव भाव्यत्वात् तत्र कुशलः दक्षः १५ आत्मवान् बुद्धिमान् मेधावी बहुग्रंथधारणसमर्थः षड्वर्गः कामादिः तस्य जेता

पृथ्वी

चातुर्वर्ण्यं स्वधर्मस्थं संस्थाप्य परिरक्षत धर्मतो धर्मविद्राजा धर्मो विग्रहवानिव ८ राजा पृथिवीदेवी श्रीमानतुलविक्रमः द्वेष्टा रतस्य नैवास्य तद्वद्दे
ष्टि न कंचन ९ समः सर्वेषु भूतेषु प्रजापतिरिवाभवत् ब्राह्मणाः क्षत्रियावैश्याः शूद्राश्चैव स्वकर्मसु १० स्थिताः समनसो राजं स्तेन राज्ञा
स्वधिष्ठिताः विधवानाथविकलान् कृपणांश्च बभार सः ११ सुदर्शः सर्वभूतानामासीत्सोमइवापरः तुष्टपुष्टजनः श्रीमान्सत्यवाग्दृढविक्र
मः १२ धनुर्वेदे तु शिष्योऽभून्नृपः शारद्वतस्य सः गोविंदस्य प्रियश्चासीत्पिता ते जनमेजय १३ लोकस्य चैव सर्वस्य प्रियश्चासीन्महायशाः प प३
३३ रिक्षीणेषु कुरुषु सोत्तरायाम जीजनत् १४ परीक्षिदभवत्तेन सौभद्रस्यात्मजो बली राजधर्मार्थकुशलो युक्तः सर्वगुणैर्वृतः १५ जितेंद्रियश्चात्म
वांश्च मेधावी धर्मसेविता षड्वर्गजिन्महाबुद्धिर्नीतिशास्त्रविदुत्तमः १६ प्रजा इमास्तव पिता षष्टिं वर्षाण्यपालयत् ततो दिष्टांतमापन्नः सर्वे
षां दुःखमावहन् १७ ततस्त्वं पुरुषश्रेष्ठ धर्मेण प्रतिपेदिवान् इदं वर्षसहस्राणि राज्यं कुरुकुलागतं बालएवाभिषिक्तस्त्वं सर्वभूतानुपालकः १८

ध१
दुर्गजित नीतिशास्त्रं कामंदकीययालकाम्यादि १६ षष्टि वर्षाणि जन्मतः षष्टिवर्षपर्यंतं न तु राज्यलाभात् तत्रापालयत् पालितवान् षट्त्रिंशे वर्षे लब्धराज्यस्त्रत्विंशतिवर्षपर्यंतं तत्साः नस्य
इष्टत्वादित्यर्थः दिष्टं धर्मांतं यो रंतस्त्रवसानं विदेहं कैवल्यमित्यर्थः १७ १८ ॥ ॥ ॥ रा० १०६

पितामहानां पाण्डवानां १९ आचक्ष्व भाषस्व इति गलालातश्योल्लुकन २० २३ गहने दुर्गमे २४ निस्त्रिंशः खड्गः तत्तायुधकलापवान् ततो विस्तीर्ण

द्र२ श्रियरु१

जनमेजय उवाच नास्मिन्कुले जातु बभूव राजा यो न प्रजानां प्रियकृच्च विशेषतः प्रपितामहानां वृत्तं महद्भूपपरायणानां १९ क
थं निधनमापन्नः पिता मम तथाविधः आचक्ष्व मे यथावृत्तं श्रोतुमिच्छामि तत्त्वतः २० सौतिरुवाच एवं संचोदिता राज्ञा मन्त्रिणस्ते नराधिप
ऊचुः सर्वं यथावृत्तं राज्ञः प्रियहितैषिणः २१ मन्त्रिण ऊचुः स राजा पृथिवीपालः सर्वशास्त्रभृतां वरः बभूव मृगयाशीलस्तव राजन्पिता म
हा २२ यथा पाण्डुर्महाबाहुर्धनुर्धरवरो युधि अस्मास्वासज्य सर्वाणि राजकार्याण्यशेषतः २३ स कदाचिद्वनगतो मृगं विव्याध पत्रिणा वि
पुराणंब्राह्मणोनियतव्रतः चतुरोवार्षिकान्मासान्सर्वपापैःप्रमुच्यते ३१ विज्ञेयःसचवेदानांपारगोभारतंपठन् देवाराजर्षयोह्यत्रपुण्या
ब्रह्मर्षयस्तथा ३२ कीर्त्यंतेधूतपाप्मानःकीर्त्यतेकेशवस्तथा भगवांश्चापिदेवेशोयत्रदेवीचकीर्त्यते ३३ अनेकजननोयत्रकार्त्ति
केयस्यसंभवः ब्राह्मणानांगवांचैवमाहात्म्यंयत्रकीर्त्यते सर्वश्रुतिसमूहोयंश्रोतव्योधर्मबुद्धिभिः ३४ यइदंश्रावयेद्विद्वान्ब्राह्मणानि
हपर्वसु धूतपाप्माजितस्वर्गोब्रह्मगच्छतिशाश्वतं ३५ श्रावयेद्ब्राह्मणांश्राद्धेयश्चेमंपादमंततः अक्षय्यंतस्यतच्छ्राद्धमुपावर्त्तेत्पितॄनिह
३६ अह्नायदेनः क्रियतेइंद्रियैर्मनसापिवा ज्ञानादज्ञानतोवापिप्रकरोतिनरश्चयत् तन्महाभारताख्यानंश्रुत्वैवप्रविलीयते ३७
भारतानांमहज्जन्ममहाभारतमुच्यते निरुक्तमस्ययोवेदसर्वपापैःप्रमुच्यते ३८ भारतानांयतश्चायमितिहासोमहाद्भुतः महतोह्येनसो
मर्त्यान्मोचयेदनुकीर्त्तितः ३९ त्रिभिर्वर्षैर्लब्धकामः कृष्णद्वैपायनोमुनिः नित्योत्थितः शुचिः शक्तोमहाभारतमादितः तपोनियममा
स्थायकृतमेतन्महर्षिणा तस्मान्नियमसंयुक्तैःश्रोतव्यंब्राह्मणैरिदं ४१ ॥ ॥ ॥ ॥

३९ ४० ४१ श्रीकृष्णजयकृष्णजयकृष्णजनकृष्ण॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ आ०
१२२

४२ सर्वथाधुनाः साधुतावावर्तमेनावर्त्तमानान्त्रपि कृताः कृतैः क्रमेणपापपुण्यैः तेनशोच्याः एतच्छ्रवणादेवसर्वस्यसर्वापपरिहारोभवतीभावः ४३ सिद्धिर्धर्मफलं वित्तमुद्यादितत्वामिति
। स्वर्गादप्येतच्छ्रवणंसत्वकांमन्त्रिहेतत्वादितिभावः ४४ आहः श्रद्धावान् ४५ ४६ ४७ श्रव्यंश्रुत्यर्थतोरम्यंश्रुतिसुखंशब्दतोरम्यं ४८ ४९ सद्यःस्नायीसद्योयुक्तः ५०

कृष्णद्वैपायनोक्तामिमांपुण्यांभारतीमुत्तमांकथां श्रावयिष्यंतियेविप्रायेचश्रोष्यंतिमानवाः ४२ सर्वथावर्त्तमानोवैनतेशोच्याःकृताकृतैःनरेण
धर्मकामेनसर्वःश्रोतव्यइत्यपि ४३ निखिलेनेतिहासोयंततःसिद्धिमवाप्नुयात् नतांस्वर्गगतिंप्राप्यतुष्टिंप्राप्नोतिमानवः ४४ यांश्रुत्वैवम
हापुण्यमितिहासमुपाश्नुते श्रृण्वंश्राद्धः पुण्यशीलः श्रावयंश्चेदमद्भुतं ४५ नरःफलमवाप्नोतिराजसूयाश्वमेधयोः यथासमुद्रोभगवान्य
थामेरुर्महागिरिः ४६ उभौख्यातौरत्ननिधीतथाभारतमुच्यते इदंहिवेदैःसमितंपवित्रमपिचोत्तमं ४७ श्रव्यंश्रुतिसुखंचैवपावनंशी
लवर्द्धनं यइदंभारतंराजन्वाचकायप्रयच्छति ४८ तेनसर्वामहीदत्ताभवेत्सागरमेखला पारिक्षितकथांदिव्यांपुण्यायविजयायच ४९
कथ्यमानांमयाकृत्स्नांश्रृणुहर्षकरीमिमां त्रिभिर्वर्षैःसदोत्थायीकृष्णद्वैपायनोमुनिः ५० महाभारतमाख्यानंकृतवानिदमद्भुतं धर्मे
चार्थेचकामेचमोक्षेचभरतर्षभ यदिहास्तितदन्यत्रयन्नेहास्तिनतत्क्वचित् ५१ इत्यादिपर्वणिभारतप्रशंसा॥ ॥ ॥ ॥

अद्भुतत्वमेवाह धर्मेचेतिधर्मादिचतुष्टयेउपादेयेचकारचतुष्टयोक्तेअधर्मानर्थदुःखसंसाररूपेचतुष्केहानव्येचविषयेहेयमुपादेयंचकृत्स्न मत्रैवनिरूपितंइतोधिकंयद्यन्यत्रनास्तीतिकात्स्न्येनसर्वेषां
शास्त्राणामर्थज्ञातकामेनैतदेवादरणीयमितिसर्वं ५१ अध्या॥ ॥ ॥ ॥

अ॰ १२३

राजेतिरंजकत्वा राजामहीपतिः पृथ्वीपालकः वसुः उपरिचरः १ २ ३ साक्षात्प्रसन्नोसिमूप ४ नसंकीर्येत निनीषकत्वात ५ ७ पशव्यः पशुसमोहितः स्वारूप्यः स्वः स्वर्गः तद्वत्
अतएवाक्षयः ८ ९ १० गाः बलीवर्द्दनिर्देशो ः कृषपश्यरतिहलधुरिनियुंजतेनापिशाकरधुरिदृष्टवोह्रेवतत्कार्यतिद्धेरितिभावः कृशानदीनानाश्याद्दीन। संधुक्षयंतिप्रत्यन कुर्वेति

वैशंपायनउवाच राजोपरिचरोनामधर्मनित्योमहीपतिः बभूवमृगयांगंतुंसदाकिंलधृतव्रतः १ सचेदिविषयंरम्यंवसुःपौरवनंदनः इंद्रोपदेशा
ज्जग्राहग्रहणीयंमहीपतिः २ तमाश्रमेन्यस्तशस्त्रंनिवसंतंतपोनिधिंदेवाः शक्रपुरोगावैराजानमुपतस्थिरे ३ इंद्रत्वमर्होराजायंतपसेत्यनुचिंत्य
वै तंसांत्वेननृपंसाक्षात्तपसः संन्यवर्तयत ४ देवाऊचुः नसंकीर्येतधर्मोयंपृथिव्यांपृथिवीपते त्वयाहिधर्मोविधृतः कृत्स्नंधारयतेजगत ५
इंद्रउवाच लोकेधर्मंपालयत्वंनित्ययुक्तः समाहितः धर्मयुक्तस्ततोलोकान्पुण्यान्प्राप्स्यसिशाश्वतान ६ दिविष्ठस्यभुविष्ठस्त्वंसखाभूत्वाममप्रियः
रम्यः पृथिव्यांयोदेशस्तमावसनराधिपः ७ पशव्यश्चैवपुण्यश्चप्रभूतधनधान्यवान स्वारक्ष्यश्चैवसौम्यश्चभोग्यैर्भूमिगुणैर्युतः ८ अत्यन्यानेष
देशोहिधनरत्नादिभिर्युतः वसुपूर्णाचवसुधावससेचेदिषुचेदिप ९ धर्मशीलाजनपदाः सुसंतोषाश्चसाधवः नचमिथ्याप्रलापोत्रस्वैरेष्व
पिकुतोन्यथा १० नचपित्राविभज्यंतेपुत्रागुरुहितेरताः युंजतेधुरिनोगाश्चकृशान्संधुक्षयंतिच १० सर्वेवर्णाः स्वधर्मस्थाः सदाचेदिषुमानद
नतेस्त्यविदितंकिंचित्त्रिलोकेषुयद्भवेत १२ ॥ ॥ ॥ ॥ ॥
षु२

यद्गाहृयभान्कृत्वधुरिपंजतेप्रमृतसधुक्षपंतीति। अमेत्यगाः स्वागवीः तासामप्यांश्चादिदृदृशेषुधुरियोजनंदृष्टंतदिहनास्तीत्यर्थः ११ ननेरति। आत्मज्ञानात्सर्वज्ञोभविष्यसीत्यर्थः १२॥ ॥ एम॰
१२३

उपपत्स्यते उपस्थाने १३ १४ वैजयंतीं विजयहेतुं अविकृतं मे धारयिष्यति पालयिष्यति न तु विहृतं अनया शस्त्रैरेव तात्वां न बाधिष्यत इति भावः १५ लक्ष्मणां चिह्नं १६ इष्टप्रदानं प्री
तिदानं समुद्दिश्य यष्टिं ददौ १७ शक्रस्य पूजार्थं मानार्थं। तस्याः यष्टेः गते संवत्सरान्ते यष्टिप्रवेशो द्यापि महाराष्ट्रादिषु दृश्यते १८ १९ अपरेद्युः प्रतिपदि द्वितीयसंवत्सरादौ।
अस्य छूय ऊर्ध्वस्थापनं पिटकैः मंजूषारूपैर्वस्त्रमयैः कोशैः यद्वा कांच्यामिव पेटिकाः स्वर्णादिमया वेष्टकाः यद्वे इति भाषायां प्रसिद्धा याः पिटकः पेट्रकः पेटा मंजूषाय विहे

देवोपभोग्यं दिव्यं त्वामाकाशे स्फाटिकं महत् आकाशगं त्वां महद्दिव्यं विमानमुपपत्स्यते १३ त्वमेकः सर्वमर्त्येषु विमानवरमास्थितः चरिष्य
स्युपरिस्थो हि देवो विग्रहवानिव १४ ददामि ते वैजयंतीं मालामम्लानपंकजां धारयिष्यति संग्रामे या त्वां शस्त्रैरविक्षतं १५ लक्ष्मणां वैतदे
वेन्द्रमविता तेन राधिप इंद्रमालेति विख्यातं धन्यमप्रतिमं महत् १६ यष्टिं च वैणवीं तस्मै ददौ वृत्रनिषूदनः इष्टप्रदानमुद्दिश्य शिष्टानां प्रतिपा
लिनीं १७ तस्याः शक्रस्य पूजार्थं भूमौ भूमिपतिस्तदा प्रवेशं कारयामास गते संवत्सरे तदा १८ ततः प्रभृति चाद्यापि यष्टेः क्षितिपसत्तमैः
प्रवेशः क्रियते राजन् यथा तेन प्रवर्तितः १९ अपरेद्युस्तथा चास्याः क्रियते उच्छ्रयो नृपैः अलंकृतायाः पिटकैर्गंधैर्माल्यैश्च भूषणैः २० मा
ल्यदामपरिक्षिप्ता विधिवत् क्रियते पि च भगवान् पूज्यते चात्र हंसरूपेण चेश्वरः स्वयमेव गृहीतेन वसोः प्रीत्या महात्मनः २१ स तां पूजां महेंद्र
स्तु दृष्ट्वा देवः कृतां शुभां वसुना राजमुख्येन प्रीतिमानब्रवीत् प्रभुः २२ ये पूजयिष्यंति नरा राजानश्च महं मम कारयिष्यंति च मुदा यथा
चेदिपतिर्नृपः २३ ॥ ॥ ॥ ॥ ॥ ॥ ॥=

गिकेत्यमरः २० हंसरूपेणायुक्तो हंसरूपी। तस्यैव वसुद्दिष्टस्य रूपस्य विशेषणं स्वयमेव गृहीतेनेति। हंसरूपेणावासव इति पाठे स्पष्टोऽर्थः २१ देवः कृतामिति पाठः विसर्गाभावेन देवेति जनमेजयसं
बोधनं २२ महं उत्सवं महः उद्धव उत्सव इत्यमरः २३ ॥

२५ २६ वरदानं च महायज्ञास्तैः २७ ३० वासवाः वसुपुत्राः ३२ इंद्रप्रसादे इंद्रदत्ते विमाने ३३ पुरोपवाहिनी पुरसमीपे वहंतीं अरौत्सीत् । आत्मन्येवावरुरोध ३४ ३५

तेषां श्रीर्विजयश्चैव सततस्थास्यतां भविष्यति तथा स्फीतो जनपदेषु स्थितिस्तु भविष्यति २४ एवं महात्मना तेन महेंद्रेण नराधिप वसुः प्रीतात्मना मघवता
महाराजोऽभिसत्कृतः २५ उत्सवं कारयिष्यंति सदा शक्रस्य ये नराः भूमिरत्नादिभिर्द्दानैस्तथा पूज्या भवंति ते २६ वरदानमहायज्ञैस्तथा शक्रोत्सवेन च
संपूजितो मघवता वसुश्चेदीश्वरो नृप २७ पालयामास धर्मेण वेदिस्थः पृथिवीमिमां इंद्रप्रीत्या चेदिपतिश्चकारेंद्रमहे वसुः २८ पुत्राश्चास्य म
हावीर्याः पंचाशन्नमितौजसः नानाराज्येषु वसुस्तानभ्यषेचयत् २९ महारथो मागधानां विश्रुतो यो बृहद्रथः प्रत्यग्रहः कुशांबश्च यमा
हुर्मणिवाहनं ३० मावेल्लश्च यदुश्चैव राजन्यश्चापराजितः एते तस्य सुता राजन्राजर्षेर्भूरितेजसः ३१ न्यवेशयन्नामभिः स्वैस्ते देशांश्च पुरा
णि च वासवाः पंच राजानः पृथग्वंशाश्च शाश्वताः ३२ वसंतमिंद्रप्रासादे आकाशे स्फाटिके च तं उपतस्थुर्महात्मानं गंधर्वाप्सरसो नृपं ३३
राजोपरिचरेत्येवं नाम तस्याथ विश्रुतं पुरोपवाहिनीं तस्य नदीं शुक्तिमतीं गिरिः अरौत्सीच्चेतनायुक्तः कामात्कोलाहलः किल ३४ गि
रिं कोलाहलं तं तु पदा वसुरताडयत् निश्चक्राम ततस्तेन प्रहारविवरेण सा ३५ तस्यां नद्यामजनयन्मिथुनं पर्वतः स्वयं तस्माद्विमोक्ष
णात्प्रीता नदी राज्ञे न्यवेदयत् ३६ यः पुमानभवत्तत्र तं स राजर्षिसत्तमः वसुर्वसुप्रदश्चक्रे सेनापतिमरिंदमः ३७ चकार पत्नीं कन्यां तु तथा तां गिरि
कां नृपः वसोः पत्नी तु गिरिका कामकालं न्यवेदयत् ऋतुकालमनुप्राप्ता स्नाता पुंसवने शुचिः ३८ ॥

नद्यौ राज्ञे न्यवेदयत् मिथुनमित्यनुषज्यते ३६ ३७ पुंसवने पुंप्रसवयोग्ये काले ३८ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥

तदहः तस्मिन्दिने ३९ ४५ सिंहावलोकनेनाशोकमेवविशिनष्टि मधुगंधैरितिवायुनाकामोद्दीपकेनधूम्रं मलिनं रतिकर्मतदर्थं मंदस्त्रीविपर्याद्वीतिमनसस्तामेवमनसागात्ततयासहमान

तदहः पितृभिश्चोदितःसोथमृगान्हंतुमितिचोदितः तंराजसत्तमंप्रीतास्तदामतिमतांवर ३९ सपितॄणांनियोगंतमनतिक्रम्यपार्थिवः चचारमृगयांकामीगिरिका
मेवसंस्मरन् अतीवरूपसंपन्नांसाक्षाच्छ्रियमिवापरां ४० अशोकैश्चंपकैश्चूतैरनेकैरतिमुक्तकैः पुन्नागैः कर्णिकारैश्चवकुलैर्दिव्यपाटलैः ४१ पाटलै
र्नारिकेलैश्चचंदनैश्चार्जुनैस्तथा एतैरम्यैर्महावृक्षैःपुण्यैःस्वादुफलैर्युतं ४२ कोकिलाकुलसन्नादंमत्तभ्रमरनादितं वसंतकालेतत्तस्यवनंचैत्ररथोप
मं ४३ मन्मथाभिपरीतात्मानापश्यद्गिरिकांतदा अपश्यन्कामसंतप्तश्चरमाणोयदृच्छया ४४ पुष्पसंछन्नशाखाग्रंपल्लवैरुपशोभितं अशोकंस्तव
कैश्छन्नंरमणीयमपश्यत ४५ अधस्तात्तस्यछायायांसुखासीनोनराधिप मधुगंधैश्चसंयुक्तंपुष्पगंधमनोहरं वायुनाप्रेर्यमाणस्तुधूम्रायमुदम
न्वगात् ४६ तस्यरेतः प्रचस्कंदचरतोगहनेवने ४७ स्कन्नमात्रंचतद्रेतोवृक्षपत्रेणभूमिपः प्रतिजग्राहमिथ्यामेनपतेदेतदूरुत ४८ इदंमि
थ्यापरिस्कन्नंरेतोमेनभवेदिति ऋतुश्चतस्याःपत्न्यामेनमोघः स्यादितिप्रभुः ४९ संचिंत्यैवंतदाराजाविचार्यचपुनःपुनः अमोघत्वंचवि
ज्ञायरेतसोराजसत्तमः ५० शुक्रप्रस्थापनेकालंमहिष्याःप्रसमीक्ष्यवै अभिमंत्र्याथतच्छुक्रमारात्तिष्ठंतमाशुगं सूक्ष्मधर्मार्थतत्त्वज्ञोगत्वाश्येन
तंततोब्रवीत् ५१ मत्प्रियार्थमिदंसौम्यशुक्रंममगृहंनयगिरिकायाःप्रयच्छाशुतस्याह्यार्तवमद्यवै ५२ ॥ ॥ ॥ ॥ ॥

संप्रहृतमकरोदित्यर्थः ४६ प्रचस्कंदच्युपात ४७ मिथ्याप्रमत्तवमत्ववेनालीकमार्पं ४ ४९ ५० अभिमंत्र्यपुत्रोत्पत्तिलिंगैर्मंत्रैःसंस्कृत्यस्थाश्याएतविमानैकदेशस्थमपि ५१
आर्त्तवंऋतुकालीनांस्नानम् ५२ ॥ ॥ ॥ ॥ ॥

म्रा॰
१२५

५३ ५४ युध्यतोः सतोः ५५ अद्रिकागिरिकेतिनामसाम्यादेकस्या एवाप्सरसोऽवस्थाभेदे न देहद्वयं ज्ञेयं। अन्यथा राज्ञो मिथ्यासंकल्पत्वापत्तेः ५६ ५७ मासे दशमे प्राप्ते बंबंधुरिति संबंधः

म१

गृहीत्वा तत्तदा श्येनेन खगामुत्पपात वेगवान् जवं परमास्थाय प्रदुद्राव विहंगमः ५३ तमपश्यत्तदायान्तं श्येनं श्येनस्तथा परः अभ्यद्रवत्तं सद्यो दृष्ट्वै
वामिषशंकया ५४ तं रयुद्धमथाकाशे तावुभौ संप्रचक्रतुः युध्यतोः पतितं रेतस्तच्चापि यमुनाम्भसि ५५ तत्राद्रिकेति विख्याता ब्रह्मशापाद्वराप्सराः मी
नभावमनुप्राप्ता बभूव यमुनाचरी ५६ श्येनपादपरिभ्रष्टं तद्वीर्यमथ वासवं जग्राह तरसोपेत्य साद्रिका मत्स्यरूपिणी ५७ कदाचिदपि मत्सी तां ब
बंधुर्मत्स्यजीविनः मासे च दशमे प्राप्ते तदा भरतसत्तम ५८ उज्जह्रुरुदरात्तस्याः स्त्रीपुमांसं च मानुषं आश्चर्यभूतं तद्गत्वा राज्ञेऽथ प्रत्यवेदयन् ५९
काये मत्स्या इमौ राजन् संभूतौ मानुषाविति तयोः पुमांसं जग्राह राजोपरिचरस्तदा ६० स मत्स्यो नाम राजासीद्धार्मिकः सत्यसंगरः साप्सरा मुक्तशा
पा च क्षणेन समपद्यत ६१ या पुरोक्ता भगवता तिर्यग्योनिगता शुभा मानुषौ जनयित्वा त्वं शापमोक्षमवाप्स्यसि ६२ ततः सा जनयित्वा तौ
विशस्ता मत्स्यघातिना संत्यज्य मत्स्यरूपं सा दिव्यं रूपमवाप्य च ६३ सिद्धर्षिचारणपथं जगामाथ वराप्सराः सा कन्या दुहिता तस्या मत्स्या मत्स्यस
गंधिनी ६४ राज्ञा दत्ताथ दाशाय कन्येयं ते भवत्विति रूपसत्त्वसमायुक्ता सर्वैः समुदिता गुणैः ६५ सा तु सत्यवती नाम मत्स्यघात्यभिसंश्रयात आ
सीत्सा मत्स्यगंधैव कंचित्कालं शुचिस्मिता ६६ शुश्रूषार्थं पितुर्नावं वाहयंतीं जले च तां तीर्थयात्रां परिक्रामन्नपश्यद्वै पराशरः ६७ ॥ ॥

उम३ वा१

५८ उज्जह्रुः उद्धृतवंतः ५९ काये देहे। मत्स्याः मत्स्ययोषायाः ६० ६३ मत्स्यसंगंधिनी नाम मत्स्यसमानगंधा ६४ दाशाय कैवर्त्ताय ६५ ६६ ६७ ॥ ॥ रा॰
१२५

६६ ६७ चकमेकामितवान ६८ ६९ ७० नीहारंधूमिकां ७१ ७२ पितृवशेऽहंछात्तदनमारिणीपितृवशानुगां ७३ नस्थातुंशक्ष्ये इंतोस्महेकन्यात्वदूषणादिसर्गः ७४ ७८

पं४

अतीवरूपसंपन्नांसिद्धानामपिकांक्षितां दृष्ट्वैवचसतांधीमांश्चकमेचारुहासिनीं ६८ दिव्यांतांवासवींकन्यांरंभोरूंमुनिपुंगवः संसर्गंममकल्याणिकुरुष्वे

त्यभ्यभाषत ६९ साब्रवीत्पश्यभगवन्पारावारेस्थितानृषीन् आवयोर्दृष्टयोरेभिः कथंनुस्यात्समागमः ७० एवंतयोक्तोभगवान्नीहारमसृजत्प्र

भुः येनदेशः ससर्वस्तुतमोभूतइवाभवत् ७१ दृष्ट्वासृष्टंतुनीहारंततस्तंपरमर्षिणा विस्मितासाभवत्कन्याव्रीडिताचतपस्विनी ७२ सत्यवत्युव

विद्धिमांभगवन्कन्यांसदापितृवशानुगां त्वत्संयोगाच्चदुष्येतकन्याभावोममानघ ७३ कन्यात्वेदूषितेचापिकथंशक्ष्येद्विजोत्तम गंतुंगृहमृषेचाहंधी

मन्नस्थातुमुत्सहे ७४ एतत्संचिंत्यभगवन्विधत्स्वयदनंतरं एवमुक्तवतींतांतुप्रीतिमानृषिसत्तमः ७५ उवाचमत्प्रियंकृत्वाकन्यैवत्वंभविष्यसि वृणी

ष्वचवरंभीरुयंत्वमिच्छसिभाविनि ७६ वृथाहिनप्रसादोमेभूतपूर्वःशुचिस्मिते एवमुक्तावरंवव्रेगात्रसौगंध्यमुत्तमं ७७ साचास्मैभगवान्प्रादान्मन

सःकांक्षितंप्रभुः ततोलब्धवराप्रीतास्त्रीभावगुणभूषिता ७८ जगाममहसंसर्गमृषिणाद्भुतकर्मणा तेनगंधवतीत्येवंनामास्याःप्रथितंभुवि ७९

तस्यास्तुयोजनाद्गंधमाजिघ्रंतनराभुवि तस्यायोजनगंधेतिततोनामापरंस्मृतं ८० इतिसत्यवतीहृष्टालब्ध्वावरमनुत्तमं पराशरेणसंयुक्तासद्योगर्भं

सुषावसा ८१ जज्ञेचयमुनाद्वीपेपाराशर्यःसवीर्यवान् समातरमनुज्ञाप्यतपस्येवमनोदधे ८२ स्मृतोहंदर्शयिष्यामिकृत्येष्वितिचसोब्रवीत्

एवंद्वैपायनोजज्ञेसत्यवत्यांपराशरात् ८३ ॥ ॥ ॥ ॥ ॥ ॥

पं४

स्त्रीभावेयोगुणाःपुष्पवत्त्वादितेनभूषितासद्यःपुष्पवसमृद्धिसर्गः ७९ तांकन्याभावेसौगंध्यंचलब्ध्वासद्योगर्भंचसुषाव ८१ ८२ ८३ ॥ ६९ ॥ ६ ॥ ६ ॥

द्वीपमेवअयनंस्थानंयस्यसद्वीपायनः स्वार्थेतद्धितः द्वीपायनएवद्वैपायनइतिनामनिर्वक्ति।न्यस्तइति।पादापसारिणांयुगेपादशःक्षीयमाणांकलौएकपाद मात्रमवशिष्टमित्यर्थः एवंआयुरादिष्वा
संवीक्ष्य २४ ब्रह्मणोवेदस्य।अनुग्रहोरक्षणं।विव्यासशाखाभेदेनोक्तवान्।अतोव्यासइत्यपितस्यनामेत्यर्थः २५ महाभारतपंचमानितिभारतंपंचमोवेदः सर्वश्रुतिसमूहोयमितिसम [illegible]

न्यस्तोद्वीपेमयद्बालस्तस्माद्वैपायनस्मृतः पादापसारिणांधर्मंसतुविद्वानयुगेयुगे आयुःशक्तिंचमर्त्यानांयुगावस्थामवेक्ष्यच २४ ब्रह्मणोब्राह्मणानां
चतथानुग्रहकांक्षया विव्यासवेदान्यस्मात्सतस्माद्व्यासइतिस्मृतः वेदानध्यापयामासमहाभारतपंचमान्सुमंतुंजैमिनिंपैलंशुकंचैवस्वमात्म
जं २६ प्रभुर्वरिष्ठोवरदोवैशंपायनमेवच संहितास्तैःपृथक्त्वेनभारतस्यप्रकाशिताः २७ तथाभीष्मःशांतनवोगंगायाममितद्युतिः वसु
वीर्यात्समभवन्महावीर्योमहायशाः २८ वेदार्थविच्चभगवानृषिर्विप्रोमहायशाः शूलेप्रोतःपुराणर्षिरचौरश्चौरशंकया २९ ॥ ॥ ॥
श्चौर

रितरवणशाखवदिदंनमंतव्यमित्यर्थः २६ भारतस्यमूलभूताः संहिताः मंत्रब्राह्मणरूपावेदास्तैः सुमंतुप्रभृतिभिःप्रकाशिताः इदमस्यमूलमिदमस्यमूलमितिस्पष्टीकृताः तेनप्रसक्तैवेद[illegible]मूलमे
तदितिभावः २७ वसुवीर्यादित्यष्टानांवसूनांअंशात् २८ २९ ॥ ॥ ॥ ॥

टि१ टि१

आहूय समीपमानीय आह स्मेत्यध्याहारः ध्वधिक्षिप्य ९० ९१ बधः पीडापमानो वा ९३ कुंतेर्भोजस्य ९५ ९६ अनादिनिधन इति स्थूलदेहस्य जन्ममरणयोर्व्यावृत्तिः देवः दीप्यमानः जगत्कर्ता

किं तेन सः न प्रभुः जीवस्य सत्वेपि जगत्कर्तृत्वाभावात् अन्यथा स्वप्नेप्रतिकूलसृष्ट्यनुपपत्तिः एतेन कर्मद्वारापि जगत्कर्तृत्वं जीवस्य लांगलेंगयादीन् दहतोतिवन्निमित्तमात्रेणानत्वीश्वरत्वेन

निदर्शितं अव्यक्तं अव्याकृतं किं सेषुसंकारणं सद्भाव्यमयोर्जानेयदीं अत्र बोधयोरिति तद्व्यावर्तयति अक्षरमिति नक्षरसपरिणामित्वात् ननु ऊर्णनाभपीड्वद्युक्तं एतेन व्यष्टिस्थूलसूक्ष्मकारण

आणीमांडव्य इत्येवं विख्यातः सुमहायशाः सधर्ममाहूय पुरा महर्षिरिदमुक्तवान् ९० इषीकया मया बाल्यादिद्धा ह्येका शकुंतिका तत्किल्बिषं

स्मरे धर्म नान्यत्पापमहं स्मरे ९१ तन्मे सहस्रसमितं कस्मान्नेहाजयत्तपः गरीयान्ब्राह्मणवधः सर्वभूतवधाद्यतः ९२ तस्मात्त्वं किल्बिषी

धर्म शूद्रयोनौ जनिष्यसि तेन शापेन धर्मोपि शूद्रयोनावजायत ९३ विद्वान्विदुररूपेण धार्मी तनुरकिल्बिषी। संजयो मुनिकल्पस्तु

जज्ञे सूतो गवल्गणात् ९४ सूर्याच्च कुंतिकन्यायां जज्ञे कर्णो महाबलः सहजं कवचं बिभ्रत्कुंडलोद्योतिताननः ९५ अनुग्रहार्थं लोका

नां विष्णुर्लोकनमस्कृतः वसुदेवात्तु देवक्यां प्रादुर्भूतो महायशाः ९७ अनादिनिधनो देवः स कर्ता जगतः प्रभुः अव्यक्तमक्षरं ब्रह्म प्रधानं त्रि

गुणात्मकं ९८ ॥ ॥ टि२ ॥ ॥ ॥ ॥ ॥

देहव्यावर्तनेन तत्वंपदार्थशोधकः अन्यथा भगवति जन्माद्यसक्तेस्तद्वारकमनादिनिधनेतिविशेषणमनुपपन्नं तत्सदार्थमाह अव्यक्तमक्षरं ब्रह्म प्रधानं प्रधीयते अस्मिन्सर्वमिति लयस्थानं त्रिगुणा

त्मकं सत्वरजस्तमोमयं ९७ ९८ ॥ ॥ ॥ ॥ ॥ ॥ ॥

अ० १२७

अस्यसोव्याभिमतंअनात्मत्वंपरिणामित्वंचवारयति आत्मानंअव्ययमिति विशेषणाभ्यां प्रधानत्वादेवप्रकृतिंउपादानं प्रभवंउत्पत्तिनिमित्तं प्रभुंअधिष्टातारं तत्तुघटादेः मृदुपादानंचैत्रोनिमित्तंकुलाल
कर्त्ताअत्र तत्त्रयमपिदेवएवेत्युक्तंतत्कथमित्याशंकातत्स्थानेदेवानुप्राविशदितिश्रुत्यर्थमाह पुरुषंपूर्षुशरीरेषुवसतीतिपुरुषः पुरश्चज्ञानेंद्रियाणिखलुपंचतथापराणिकर्मेंद्रियाणिमनआदिच
तथ्यंच प्राणादिपंचकमथोवियदादिकंचकामश्चकर्मचतमः पुनरष्टमीपूरितिप्रोक्ताः आत्मानमेवद्याविद्यायासर्वंस्रष्टृकाकारंकृत्वातत्रप्रवि॰ इत्यर्थः एवंचेश्वरोपवेशांतासृष्टिजायदादिविमोक्षांता

आत्मानमव्ययंचैवप्रकृतिंप्रभवंप्रभुं पुरुषंविश्वकर्माणंसत्व
योगंध्रुवाक्षरं ९८ ॥ ॥श्रीरामायनमः॥ ॥

जैवीसृष्टिंतदुक्तप्रविश्यसच्चत्यच्चाभवदित्यादिश्रुत्युक्तांसंगृह्णाति विश्वकर्माणमितिविश्वंदृश्यंयस्यतेजोरूपंसत्त्वंद्रष्टृवाच्यंवायुआकाशादिरूपंसत्त्वद्रष्टृवाच्यंचेत्येवमादिरूपंकर्मक्रियादिवत्क्रियाफ
लभूतंयस्येतिविश्वकर्माणं एवंविशेषणैरेवब्रह्मणएवजीवभावप्रदर्शयंतल्लिंगहंत्तुपायमपितैरेवप्रसाधयति सत्वयोगंसत्वेनैवधर्मज्ञानवैराग्यमलेनयोगःप्राप्तिरस्येतिसत्ववतःब्रह्मभा
वप्राप्तावालंवनमाह ध्रुवाक्षरंप्रणवाख्यंव राशिरूपंवाच्यवाचकयोरभेदात्प्रणवमात्रैभिरकारोकारमकारार्द्धमात्राभिरूपासिताभिस्तदर्थभूतविराडादिरूपंत्वां तत्र यमितिरीत्याव्याः
प्राप्यं तइतिभावः ९८ ॥ ॥ ॥ ॥ ॥ ॥ ॥ रा० १२७

एतेषु कतमो मुख्यः प्राप्यः स्मृतः आह। अनंतमिति देशतः कालतो वस्तुतश्चापरिच्छिन्नं तुरीयमित्यर्थः। ननु तत्त्वस्यापां सर्वेषामानंत्यम
विशिष्टमित्याशंक्याह। अचलमिति। अबाधितं इतरेषां बाधोस्तीत्यापेक्षिकमनंतत्वमिति भावः। नन्वेवं कारणत्वादिविशेषेऽभूतमेव स्यादित्या
ह। देवं द्योतमानं चिद्रूपमित्यर्थः। एवं तर्हि कुर्वीज द्वारमुवस्त्वविएर्द्रस्तत्रेशब्दाएतुरीयप्राप्तिमुक्त्वा तत्रैव द्वारांतरमाह। हंसं सन्मात्रा आत्मरूपं तत्र ह्यवि
द्येयणा अवरणादिकं सिध्यतीति सोपि द्वारं नारायणं फलस्थानीयं यंपं च ममहाविस्मा एतद्विग्रहध्यानद्वारैवाहिविएडादिभावमारोहंतिध्यापिनः फल
गर्भे बीजानीवास्य गर्भे नंतानि कारणानि संतीत्यनंतरीयविशेषणैरेव विशिनष्टि प्रभुं प्रभवत्यस्मात्कार्यमिति जगद्भूमाधिष्ठानं। धातारं कार्यस

अनंतमचलं देवं हंसं नारायणं प्रभुं धातारमजमव्यक्तं यमाहुः परमव्ययं ९९ कैवल्यं निर्गुणं विश्वमनादिमजमव्ययं
पुरुषः स विभुः कर्त्ता सर्वभूतपितामहः धर्मसंवर्द्धनार्थाय प्रजज्ञेंधकवृष्णिषु १००

स्यास्य मूर्तेः समर्पकं। अजं उरगोपादानमजरज्जुवद्यज्ञात्तं। अव्यक्तं। अप्रकटं। अप्रकटं। अधिष्ठानमव्यक्तं। अप्रकटं। अधिष्ठानमव्यक्तं हि अध्यस्त
मेव लुप्यते ततोऽव्यक्तं। यं आदित्यवर्णं तमसः परस्तादित्यादयो मंत्राः। यं कारणात्परमाहुः। अतएव चाव्ययं नाशबाधाभ्यां हीनं ९९ कैवल्यं केव
लमेव कैवल्यं असंगं निर्गुणं रूपादिभिश्च सत्वादिभिश्च हीनं। अत्र विग्रहवत्वात्मसत्वे परिच्छिन्नत्वं कारणावस्थजन्मनाशं चेति तत्स्वरूपं क्रमेण
व्यावर्त्तयति। विश्वमनादिमजमव्ययमिति। मायिकत्वाद्विग्रहस्य न तत्कृतपरिच्छेदादयोऽस्मिन्संभवंतीत्यर्थः। य एवंरूपो नारायणः स एव देवकीसु
नुरित्याह पुरुष इति। स एवंभूतोऽक्ताः सो रामकृष्णो जन्मेन तु मध्यरूपेण जातः इत्यर्थः १००

आ॰
१२८

विशारदौ प्रयोगकुशलौ १ द्रोण्यां गिरिदर्यां २ शरस्तंबात् शरस्तंबे स्कन्नात् द्वैधीभूतात् तेजसः ३ ४ वैताने त्रेताग्निसाध्ये ५ ७ तस्य दुर्यो

अस्त्रैस्तु महावीर्यौ सर्वशास्त्रविशारदौ सात्यकिः कृतवर्मा च नारायणमनुव्रतौ १ सत्यकाद्धृदिकाच्चैव जज्ञातेस्त्रवि
शारदौ भरद्वाजस्य च स्कन्नं द्रोण्यां शुक्रमवर्द्धत २ महर्षेरुग्रतपसस्तस्माद्द्रोणो व्यजायत गौतमान्मिथुनं जज्ञे शरस्तंबा
च्छरद्वतः ३ अश्वत्थाम्नश्च जननी कृपश्चैव महाबलः अश्वत्थामा ततो जज्ञे द्रोणादेव महाबलः ४ तथैव धृष्टद्युम्नोपि
साक्षादग्निसमद्युतिः वैताने कर्मणि तते पावकात्समजायत ५ वीरो द्रोणविनाशाय सह धनुषा वीर्यवान तथैव वेद्यां कृ
ष्णापि जज्ञे तेजस्विनी शुभा ६ विभ्राजमाना वपुषा बिभ्रती रूपमुत्तमं प्रह्लादशिष्यो नग्नजित्सुबलश्चाभवत्ततः त
स्य प्रजा धर्महंत्री जज्ञे देवप्रकोपना गांधारराजपुत्रोभूच्छकुनिः सौबलस्तथा ८ दुर्योधनस्य जननी जज्ञातेर्थविशारदौ कृ
ष्णद्वैपायनाज्जज्ञे धृतराष्ट्रो जनेश्वरः क्षेत्रे विचित्रवीर्यस्य पांडुश्चैव महाबलः ९ धर्मार्थकुशलो धीमान्मेधावी धूतकल्म
षः विदुरः शूद्रयोनौ तु जज्ञे द्वैपायनादपि १० पांडोस्तु जज्ञिरे पंच पुत्रा देवसमाः पृथक् द्वयोः स्त्रियोर्गुणज्येष्ठ
स्तेषामासीद्युधिष्ठिरः ११ धर्माद्युधिष्ठिरो जज्ञे मारुताच्च वृकोदरः इंद्राद्धनंजयः श्रीमान्सर्वशस्त्रभृतां वरः १२ जज्ञा
ते रूपसंपन्नावश्विभ्यां च यमावपि नकुलः सहदेवश्च गुरुशुश्रूषणे रतौ १३ तथा पुत्रशतं जज्ञे धृतराष्ट्रस्य धीम
तः दुर्योधनप्रभृतयो युयुत्सुः करणस्तथा १४

धनमातुर्धर्महंत्री सैपुत्रद्वारैव ८ ९ प्रसंगात्पुनर्विदुरजन्मोक्तिः १० ११ १२ १३ १४ ॥ ॥ ७ ७ ॥ ७ राम॰ १२८

१५ युयुत्सुः शताधिकः करणस्तु वैश्यायां क्षत्रियाज्जातः करणः परिकीर्तित इति स्मृतः १६ २० स्थूणो नाम्ना २१ २३ अध्या

ततो दुःशासनश्चैव दुःसहश्चापि भारत दुर्मर्षणो विकर्णश्च चित्रसेनो विविंशतिः १५ जयः सत्यव्रतश्चैव पुरुमित्र
श्च भारत वैश्यापुत्रो युयुत्सुश्च एकादश महारथाः १६ अभिमन्युः सुभद्रायामर्जुनादभ्यजायत स्वस्रीयो वासु
देवस्य पौत्रः पांडोर्महात्मनः १७ पांडवेभ्यो हि पांचाल्यां द्रौपद्यां पंच जज्ञिरे कुमारा रूपसंपन्नाः सर्वशास्त्रविशार
दाः १८ प्रतिविंध्यो युधिष्ठिरात्सुतसोमो वृकोदरात् अर्जुनाच्छ्रुतकीर्तिस्तु शतानीकस्तु नाकुलिः १९ तथैव
९५ सहदेवाच्छ्रुतसेनः प्रतापवान् हिडिंबायां च भीमेन वने जज्ञे घटोत्कचः २० शिखंडी द्रुपदाज्जज्ञे कन्या पुत्रत्वमाग
ता यां यक्षः पुरुषं चक्रे स्थूणः प्रियचिकीर्षया कुरूणां विग्रहे तस्मिन्समागच्छन्बहून्यथ राज्ञां शतसहस्राणि यो
त्स्यमानानि संयुगे २२ तेषामपरिमेयानां नामधेयानि सर्वशः न शक्यानि समाख्यातुं वर्षाणामयुतैरपि एते तु की
र्तिता मुख्या यैराख्यानमिदं ततं २३ इत्यादिपर्वणि ॥ जनमेजय उवाच ॥ य एते कीर्तिता ब्रह्मन्ये चान्ये नानुकीर्तिताः
सम्यक्तान् श्रोतुमिच्छामि राज्ञश्चान्यान्सहस्रशः १ यदर्थमिह संभूता देवकल्पा महारथाः भुवि तन्मे महाभाग
सम्यगाख्यातुमर्हसि २ वैशंपायन उवाच रहस्यं खल्विदं राजन्देवानामिति नः श्रुतं तत्तु ते कथयिष्यामि न
मस्कृत्वा स्वयंभुवे ३ त्रिःसप्तकृत्वः पृथिवीं कृत्वा निःक्षत्रियां पुरा जामदग्न्यस्तपस्तेपे महेंद्रे पर्वतोत्तमे ४
तदा निःक्षत्रिये लोके भार्गवेण कृते सति ब्राह्मणान्क्षत्रिया राजन्सुतार्थिन्योऽभिचक्रमुः ५ ताभिः सह समा
पेतुर्ब्राह्मणाः संशितव्रताः ऋतावृतौ नरव्याघ्र न कामान्नानृतौ तथा ६ तेभ्यस्तु लेभिरे गर्भं क्षत्रियास्ताः सहस्र
शः ततः सुषुविरे राजन्क्षत्रियान्वीर्यवत्तरान् ७ कुमारांश्च कुमारीश्च पुनः क्षत्राभिवृद्धये एवं तद्ब्राह्मणैः क्षेत्रे
क्षत्रियाणां तपस्विभिः ८

ममय एते इति १ २ ३ त्रिःसप्तकृत्वः एकविंशतिवारान् ४ ५ ६ ७ ८ ॥ ७ ॥

शा॰ १२६ ब्राह्मणोत्तराः ब्राह्मणप्रधानाः ९ १० जीविनः जीविनः ११ आधिभिः शोकादिभिः व्याधिभिः ज्वरादिभिः ॥ १२ अपांगः इवापांगः
प्रांतः सागरांतामित्यर्थः अध्यतिष्ठत अधिष्ठितवनाहे गजेंद्रगन १३ १४ १५ स्वादुरोचकं पथ्यास्यात्तथा १६ १९ ब्रह्मवेदं न विक्रीणा

जाते वृद्धं च धर्मेण सुदीर्घेणायुषान्वितं ब्राह्मणेऽपि ततो वर्णा बभूवुर्ब्राह्मणोत्तराः ९ अभ्यगच्छन्नृतौ नार्यो न कामान्नानृतौ तथा तथैवान्यानि भूतानि तिर्यग्योनिगतान्यपि १० अतो दारांश्च गच्छंति तस्मिन्नपा भरतर्षभ ततो वर्द्धंत धर्मेण सहस्रशतजीविनः ११ ताः प्रजाः पृथिवीपाल धर्मव्रतपरायणाः आधिभिर्व्याधिभिश्चैव विमुक्ताः सर्वशो नराः १२ अपेमां सगरापांगीं गोगजेंद्रगताखिलां अध्यतिष्ठत्सुनः क्षत्रं सशैलवनपत्तनां १३ प्रशासति पुनः क्षत्रे धर्मेणेमां वसुंधरां ब्राह्मणाद्यास्ततो वर्णा लेभिरे मुदमुत्तमां १४ कामक्रोधोद्भवान्दोषान्निरस्य च नराधिपाः धर्मेण दंडं दंड्येषु प्रणयंतोऽन्वपालयन् १५ तथा धर्मपरे क्षत्रे सहस्राक्षः शतक्रतुः स्वादु देशे च काले च वर्षेणापालयत्प्रजाः १६ न बाल एव म्रियते तदा कश्चिज्जनाधिप न च स्त्रियं प्रजानाति कश्चिदप्राप्तयौवनः १७ एवमायुष्मतीभिश्च प्रजाभिर्भरतर्षभ इयं सागरपर्यंता समापूर्यत मेदिनी १८ ईजिरे च महायज्ञैः क्षत्रिया बहुदक्षिणैः सांगोपनिषदान्वेदान्विप्राश्चाधीयते तदा १९ न च विक्रीणते ब्रह्म ब्राह्मणाः स्म तदा नृप न च शूद्रसमाभ्याशे वेदानुच्चारयंत्युत २० कारयंतः कृषिं गोभिस्तथा वैश्याः क्षिताविह युंजते धुरि नो गाश्च कृशांगाश्चाप्यजीवयन् २१ फेनपांश्च तथा वत्सान्न दुहंति स्म मानवाः न कूटमानैर्वणिजः पण्यं विक्रीणते तदा २२ कर्माणि च नरव्याघ्र धर्मोपेतानि मानवाः धर्ममेवानुपश्यंतश्चक्रुर्धर्मपरायणाः २३ ॥

तेभ्यः तत्काध्यायनं न कुर्वंतीत्यर्थः २० वैश्याः स्वयं धुरि गोः बलीवर्दान्न नियुंजते २१ फेनपान् स्तन्यपानादनभिलस्यत् न दुहंति धेनूरिति राम॰ १२६
शेषः कूटमानैः कपटतुलाप्रस्थादिभिः २३ ॥ ॥

२४ आनुपूर्वसंतानादिष्वा स्वस्वकाले २५ २६ समुदिते मुदितया प्रीत्या सहिते २७ २८ देवत्वे एव्यं देवभावं वा २९ ३० मही उपचक्रमे गं
तुमिति शेषः पाठांतरे तु महीति शेषः ३७ नद्यमीति भूतसंघौघाः भूतानां शेषकूर्मदिग्गजानां धरणभूतानां संघौघाः चलसंघाः पन्नगाः शेषाः

स्वकर्मनिरताश्चासन्सर्वे वर्णा नराधिप एवं तदा नरव्याघ्र धर्मो न ह्रसते क्वचित् २४ काले गावः प्रसूयंते नार्यश्च भरत
र्षभ भवंत्यृतुषु वृक्षाणां पुष्पाणि च फलानि च २५ एवं कृतयुगे सम्यग्वर्तमाने तदा नृप आपूर्यत मही कृत्स्ना प्राणि
भिर्बहुभिर्भृशं २६ एवं समुदिते लोके मानुषे भरतर्षभ असुरा जज्ञिरे क्षेत्रे राज्ञां तु मनुजेश्वर २७ आदित्यैर्हि तदा
दैत्या बहुशो निर्जिता युधि ऐश्वर्याद्भ्रंशिताः स्वर्गात्संबभूवुः क्षिताविह २८ इह देवत्वमिच्छंतो मानुषेषु मनस्विनः ज
ज्ञिरे भुवि भूतेषु तेषु तेष्वसुरा विभो २९ गोष्वश्वेषु च राजेंद्र खरोष्ट्रमहिषेषु च क्रव्यात्सु चैव भूतेषु गजेषु मृगेषु च ३०
जातैरिह महीपाल जायमानैश्च तैर्मही न शशाकात्मनात्मानमियं धारयितुं धरा ३१ अथ जाता महीपालाः केचि
द्बहुमदान्विताः दितेः पुत्रा दनोश्चैव तदा लोकादिहाच्युताः ३२ वीर्यवंतोवलिप्तास्ते नानारूपधरा महीं इमां सा
गरपर्यंतां परीयुररिमर्दनाः ३३ ब्राह्मणान्क्षत्रियान्वैश्यान्शूद्रांश्चैवाप्यपीडयन् अन्यानि चैव सत्वानि पीडयामा
सुरोजसा ३४ त्रासयंतो विनिघ्नंतः सर्वभूतगणांश्च ते विचेरुः सर्वशो राजन्महीं शतसहस्रशः ३५ आश्रमस्था
न्महर्षींश्च धर्षयंतस्ततस्ततः अब्रह्मण्या वीर्यमदा मत्ता मदबलेन च ३६ एवं वीर्यबलोत्सिक्तैर्भूरियत्नैर्महासु
रैः पीड्यमाना मही राजन्ब्रह्माणमुपचक्रमे ३७ नद्यमी भूतसत्वौघाः पन्नगाः सनगा मही तदा धारयितुं शेकुए
क्रांता दानवैर्बलात् ३८ ॥

बहुवचनं तेषां प्रत्येकं बहूनामप्यसामर्थ्यात् किं पुनरेकैकस्येति सूचनार्थं नद्यो नामिति पाठे एता बुद्धिस्थां भूमिं ३८ ॥ ७ ॥ ७ ॥

श्रा ३९ अव्ययं अजरत्वादुपक्रमणमूर्त्तं ४० एवं ब्रह्मणो गां साष्टृथ्वी ४१ ४२ ततस्मूर्तेः कृत्स्नं प्रधानात्मनः प्रधानजगतीत्यात्मा मनो यस्यानस
१३० सांख्ययोगानां हि प्रधानजापिनः सर्वज्ञत्वं सर्वशक्तित्वं च भवतीति प्रसिद्धा सर्वज्ञस्य ना विदितं किंचिदस्तीत्यर्थः प्रधानात्मनः कारणात्मनः स्त

ततो महीमहीपाल भाराक्रान्ता भयपीडिता जगाम शरणं देवं सर्वभूतपितामहं ३९ सा संवृता महाभागैर्देवद्विजमह
र्षिभिः ददर्श देवं ब्रह्माणं लोककर्त्तारमव्ययं ४० गंधर्वैरप्सरोभिश्च देवकर्मसु निष्ठितैः विद्यमानं मुदोपेतैर्ववंदे
चैनमेत्य सा ४१ अथ विज्ञापयामास भूमिस्तं शरणार्थिनी सन्निधौ लोकपालानां सर्वेषामेव भारत ४२ तत्प्रधा
नात्मनस्तस्य भूमेः कृत्स्नं स्वयंभुवः पूर्वमेवाभवद्राजन् विदितं परमेष्ठिनः ४३ स्रष्टा हि जगतः कस्मान्न संबुध्येत भा
रत सुरासुराणां लोकानामशेषेण मनोगतं ४४ तामुवाच महाराज भूमिं भूमिपते प्रभुः प्रभवः सर्वभूतानामीशः
शंभुः प्रजापतिः ४५ ब्रह्मोवाच यदर्थमसि संप्राप्ता मत्सकाशं वसुंधरे तदर्थं संनियोक्ष्यामि सर्वानेव दिवौकसः
४६ इत्युक्त्वा स महादेवो ब्रह्मा एतां विसृज्य च आदिदेश तदा सर्वान् विबुधान् भूतकृत्स्वयं ४७ अस्या भूमेर्निर
सितुं भारं भागैः पृथक् पृथक् अस्यामेव प्रसूयध्वं विरोधायेति चाब्रवीत् ४८ तथैव च समानीय गंधर्वाप्सरसां गणा
न् उवाच भगवान् सर्वानिदं वचनमर्थवत् ४९ ब्रह्मोवाच स्वैः स्वैरंशैः प्रसूयध्वं यथेष्टं मानुषेषु च अथ शक्रादयः स
र्वे श्रुत्वा सुरगुरोर्वचः तथ्यमर्थ्यं च पथ्यं च तस्य ते जगृहुस्तदा ५० ॥

टी:२

भूमेः कृत्स्नमिति चार्थः ४३ नदेवाहस्रष्टा इति ४४ अस्य त्रिमूर्त्तित्वमाह प्रभव इति ईशो विष्णुः ४५ ४६ ४७ विरोधाय विरोधमूलकाय राम०
भूभारनाशायेत्यर्थः ४८ ४९ तथ्यं यथार्थं अर्थ्यं प्रार्थनीयं पथ्यं हितकरं ५० ॥ ॥ १३०

कृतलक्षणाः कृतनियमाः ५२ पृथुचार्वंचितेक्षणः पृथुनी चार्वंचिते सदृशनिमीलते ईक्षणे यस्य सः पृथुवक्षांचितेक्षणा इति पाठे वक्षश
ब्दोकारान्तः पृथुनि वक्षे वक्षसि अंचितगमने ययो सो ध्यानाहूतमाईक्षणाय स्य सः ५३ शोधनाम कंटकमूलवेलोन्मूलनाय ५४ अ

अयं ते सर्वशो शेषे स्वेर्गमिं भूमिं कृतलक्षणाः नारायणममित्रघ्नं वैकुंठमुपचक्रमुः ५१ यः स चक्रगदापाणिः
पीतवासाः शितिप्रभः पद्मनाभः सुरारिघ्नः पृथुवक्षांचितेक्षणः ५२ प्रजापतिपतिर्देवः सुरनाथो महाबलः
श्रीवत्साङ्को हृषीकेशः सर्वदैवतपूजितः ५३ तं प्रभुः शोधनायाह उवाच पुरुषोत्तमं अंशेनावतरेत्येवं तत्र येत्याह व
ते हरिः ५४ इत्यादिपर्वणि वंशावतरणे वैशंपायन उ च अथ नारायणो देवः स्वकामेह संविदं अवतर्तुं महीं स्व
र्गाद्देशतः सहितः सुरैः १ आदिश्य च स्वयं शक्रः सर्वानेव दिवौकसः निर्जगाम ततस्तस्मात्स्थानान्नारायणः स
हृ २ नेमरारिविनाशाय सर्वलोकहिताय च अवतेरुः क्रमेणैव महीं स्वर्गाद्दिवौकसः ३ ततो ब्रह्मर्षिवंशेषु
पार्थिवर्षिकुलेषु च जज्ञिरे राजसाईलप्याकामं दिवौकसः ४ दानवांश्च राक्षसांश्चैव गंधर्वान्पन्नगांस्तथा
पुरुषादानि चान्यानि जघ्नुः सत्वान्यनेकशः ५ दानवा राक्षसाश्चैव गंधर्वाः पन्नगास्तथा ततान्बलस्थान्बाल्ये
पि जघ्नुर्भरतसत्तम ६ जनमेजय उ च देवदानवसंघानां गंधर्वाप्सरसां तथा मानवानां च सर्वेषां तथैव य
क्षरक्षसां ७ श्रोतुमिच्छामि तत्त्वेन संभवं कृत्स्नमादितः प्राणिनां चैव सर्वेषां संभवं वक्तुमर्हसि ८ वैशंपा
यन उ च हंत ते कथयिष्यामि नमस्कृत्य स्वयंभुवे सुरादीनामहं सम्यक् लोकानां प्रभवाप्ययं ९ ॥ ॥

ध्यायः अथेति स्पष्टार्थान्यानात २ ३ ४ ५ दानवादयो बाल्ये एव देवान्कुतो न हतवंतस्तत्राशंक्याह दानवादीति बाल्येपि बलिन एव देवाः
इति तेषामवध्या एवेत्यर्थः ६ ८ हंतेति वाक्यारंभे प्रभवाप्ययं उत्पत्तिप्रलयं ९ ॥ ॥

स्वा॰
१३१

१० १५ जयन्तजःसम्प्रज्ञातः १६ १७ १८ १९ २० २१ २२ २३ २४ २५ २६

ब्रह्मणोमानसाःपुत्राविदिताःषण्महर्षयः मरीचिरत्र्यंगिरसौपुलस्त्यःपुलहःक्रतुः १० मरीचेःकश्यपःपुत्रः
कश्यपात्त्विमाःप्रजाः प्रजज्ञिरेमहाभागादक्षकन्यास्त्रयोदश ११ अदितिर्दितिर्दनुःकालादनायुःसिंहिकातथा
क्रोधाप्रधाचविश्वाचविनताकपिलामुनिः १२ कद्रूश्चमनुजव्याघ्रदक्षकन्यैवभारत एतासांवीर्यसंपन्नंपुत्रपौ
त्रमनंतकं १३ अदित्यांद्वादशादित्याःसंभूताभुवनेश्वराः येराजन्नामतस्तांस्तेकीर्तयिष्यामिभारत १४ धातामि
त्रोर्यमाशक्रोवरुणस्त्वंशएवच भगोविवस्वान्पूषाचसवितादशमस्तथा १५ एकादशस्तथात्वष्टाद्वादशोविष्णु
रुच्यते जघन्यजस्तुसर्वेषामादित्यानांगुणाधिकः १६ एकएवदितेःपुत्रोहिरण्यकशिपुःस्मृतः नाम्नाख्यातास्तु
तस्येमेपंचपुत्रामहात्मनः १७ प्रह्लादःपूर्वजस्तेषांसंह्रादस्तदनंतरं अनुह्रादस्तृतीयोभूत्तस्माच्चशिबिबाष्कलौ
१८ प्रह्लादस्यत्रयःपुत्राःख्याताःसर्वत्रभारत विरोचनश्चकुंभश्चनिकुंभश्चेतिभारत १९ विरोचनस्यपुत्रोभूद्बलि
रेकःप्रतापवान् बलेश्चप्रथितःपुत्रोबाणोनाममहासुरः २० रुद्रस्यानुचरःश्रीमान्महाकालेतियंविदुः चत्वा
रिंशद्दनोःपुत्राःख्याताःसर्वत्रभारत २१ तेषांप्रथमजोराजाविप्रचित्तिर्महायशाः शंबरोनमुचिश्चैवपुलोमाचेति
विश्रुतः २२ असिलोमाचकेशीचदुर्जयश्चैवदानवः अयःशिराअश्वशिराअश्वशंकुश्चवीर्यवान् २३ तथा
गगनमूर्द्धाचवेगवान्केतुमांश्चसः स्वर्भानुरश्वोश्वपतिर्वृषपर्वाजकस्तथा २४ अश्वग्रीवश्चसूक्ष्मश्चतु
हुंडश्चमहाबलः एकपादेकचक्रश्चविरूपाक्षमहोदरौ २५ निचंद्रश्चनिकुंभश्चकुपटःकपटस्तथा शरभः
शलभश्चैवसूर्याचंद्रमसौतथा एतेख्यातादनोर्वंशेदानवाःपरिकीर्तिताः २६ ॥ ॥ ॥ ॥

क२

राम॰
१३१

३१ क्रूरायाः क्रोधायाः ३२ ३३ ३८ गुणाद्भूतं अप्रधानत्वं ३९ ४० ४१ ४२ ४३ ॥

अन्यौ तु खलु देवानां सूर्याचंद्रमसौ स्मृतौ अन्यौ दानवमुख्यानां सूर्याचंद्रमसौ तथा २७ इमे च वंशाः प्रथिताः सत्ववंतो
महाबलाः दनोपुत्रा महाराज दश दानववंशजाः २८ एकाक्षो मृतपो वीरः प्रलंबनरकावपि वातापी शत्रुतपनः शठश्चै
व महासुरः २९ गविष्ठश्च वनायुश्च दीर्घजिह्वश्च दानवः असंख्येयाः स्मृतास्तेषां पुत्राः पौत्राश्च भारत ३० सिंहिका सु
षुवे पुत्रं राहुं चंद्रार्कमर्द्दनं सुचंद्रं चंद्रहंतारं तथा चंद्रप्रमर्द्दनं ३१ क्रूरस्वभावं क्रूरायाः पुत्रपौत्रमनंतकं गणः क्रोधवशो नाम
क्रूरकर्मारिमर्द्दनः ३२ दनायुषः पुनः पुत्राश्चत्वारोऽसुरपुंगवाः विक्षरो बलवीरौ च वृत्रश्चैव महासुरः ३३ कालायाः प्रथिताः
पुत्राः कालकल्पाः प्रहारिणः प्रविख्याता महावीर्या दानवेषु परंतपाः ३४ विनाशनश्च क्रोधश्च क्रोधहंता तथैव च क्रोधश
त्रुस्तथैवान्ये कालकेया इति श्रुताः ३५ असुराणामुपाध्यायः शुक्रस्त्वृषिसुतोऽभवत् ख्याताश्चोशनसः पुत्राश्चत्वारो
ऽसुरयाजकाः ३६ त्वष्टाधरस्तथात्रिश्च द्वावन्यौ रौद्रकर्मिणौ तेजसा सूर्यसंकाशा ब्रह्मलोकपरायणाः ३७ इत्येष वं
शप्रभवः कथितस्ते तरस्विनां असुराणां सुराणां च पुराणे संश्रुतो मया ३८ एतेषां यदपत्यं तु न शक्यं तदशेषतः प्रसं
ख्यातुं महीपाल गुणभूतमनंतकं ३९ तार्क्ष्यश्चारिष्टनेमिश्च तथैव गरुडारुणौ आरुणिर्वारुणिश्चैव वैनतेयाः
प्रकीर्त्तिताः ४० शेषोऽनंतो वासुकिश्च तक्षकश्च भुजंगमः कूर्मश्च कुलिकश्चैव काद्रवेयाः प्रकीर्त्तिताः ४१ भीमसे
नोग्रसेनौ च सुपर्णो वरुणस्तथा गोपतिर्धृतराष्ट्रश्च सूर्यवर्चाश्च सप्तमः ४२ सत्यवागर्कपर्णश्च प्रयुतश्चापि वि
श्रुतः भीमश्चित्ररथश्चैव विख्यातः सर्वविद्वशी ४३ ॥

आ॰
१३२

५५ ब्राह्मणो वै घसन्निधा विनिपाठे ब्राह्मणेषु वै घो विधावानन्तसन्निधौ ५६ अध्यायः ब्रह्मणा इतिषण्महर्षयः स्याणश्च सप्तमहति

तथा शालिशिरा राजन्पर्जन्यश्च चतुर्दशः कलिः पंचदशस्तेषां नारदश्चैव षोडश इत्येते देवगंधर्वा मौनेयाः परिकीर्त्ति
ताः ४४ अतः प्रभूतान्यन्यानि कीर्त्तयिष्यामि भारत अनवद्यामनुवंशामसुराणां मार्गणप्रियां ४५ अरूपां सुभ
गां भासीमिति प्राधा व्यजायत सिद्धः पूर्णश्च बर्हीच पूर्णायुश्च महायशाः ४६ ब्रह्मचारी रतिगुणः सुपर्णश्चैव सप्तमः वि
श्वावसुश्च भानुश्च सुचंद्रो दशमस्तथा ४७ इत्येते देवगंधर्वाः प्राधायाः परिकीर्त्तिताः इमं त्वप्सरसां वंशं विदितं पुण्यलक्ष
णं ४८ प्राधासूत महाभागा देवी देवर्षितः पुरा अलंबुषा मिश्रकेशी विद्युत्पर्णा तिलोत्तमा ४९ अरुणा रक्षिता चैव रं
भा तद्वन्मनोरमा केशिनी च सुबाहुश्च सुरता सुरजा तथा ५० सुप्रिया चातिबाहुश्च विख्यातौ च हाहा हूहू तुंबुरुश्चेति
चत्वारः स्मृता गंधर्वसत्तमाः ५१ अमृतं ब्राह्मणा गावो गंधर्वाप्सरसस्तथा अपत्यं कपिलायास्तु पुराणे परिकीर्त्ति
तं ५२ इति ते सर्वभूतानां संभवः कथितो मया यथावत्परिसंख्यातो गंधर्वाप्सरसां तथा ५३ भुजगानां सुपर्णानां
रुद्राणां मरुतां तथा गवां च ब्राह्मणानां च श्रीमतां पुण्यकर्मणां ५४ आयुष्यश्चैव पुण्यश्च धन्यः श्रुतिसुखावहः
श्रोतव्यश्चैव सततं श्राव्यश्चैवानसूयता ५५ इमं तु वंशं नियमेन यः पठेन्महात्मनां ब्राह्मणदेवसन्निधौ अपत्यलाभं
लभते स पुष्कलं श्रियं यशः प्रेत्य च शोभनां गतिं ५६ इत्यादिपर्वणि अथावतरणे वैशंपायन उ च ब्रह्मणो मानसाः पु
त्रा विदिताः षण्महर्षयः एकादश सुताः स्थाणोः ख्याताः परमतेजसः १ मृगव्याधश्च सर्पश्च निरृतिश्च महायशाः ॥

वोध्यं तत्रादौ स्थाणोः संततिमेवाह एकादशेति १२ श्रीरामो जयति ॥ ॥ ॥ ॥ ॥ ॥ ॥

राम:
१३२

७ ईहामृगाः वृकाः ८ ५ पतंगसहचारिणः सूर्यसहचरा वालखिल्याः ९ १४ बुद्धिर्निश्चयः मतिः परामर्शः कीर्त्यादयो दश धर्म

अजैकपादहिर्बुध्न्यः पिनाकी च परंतपः २ दहनोथेश्वरश्चैव कपाली च महाद्युतिः स्थाणुर्भगश्च भगवान्रुद्रा एका
दश स्मृताः ३ मरीचिरंगिरा अत्रिः पुलस्त्यः पुलहः क्रतुः षडेते ब्रह्मणः पुत्रा वीर्यवंतो महर्षयः ४ त्रयस्त्वंगिरसः पु
त्रा लोके सर्वत्र विश्रुताः बृहस्पतिरुतथ्यश्च संवर्तश्च धृतव्रताः ५ अत्रेस्तु बहवः पुत्राः श्रूयंते मनुजाधिप स
र्वे वेदविदः सिद्धाः शांतात्मानो महर्षयः ६ राक्षसाश्च पुलस्त्यस्य वानराः किन्नरास्तथा यक्षाश्च मनुजव्याघ्र पुत्रा
स्तस्य च धीमतः ७ पुलहस्य सुता राजंछरभाश्च प्रकीर्तिताः सिंहाः किंपुरुषा व्याघ्रा यक्षा ईहामृगास्तथा ८
क्रतोः क्रतुसमाः पुत्राः पतंगसहचारिणः विश्रुतास्त्रिषु लोकेषु सत्यव्रतपरायणाः ९ दक्षस्त्वजायतांगुष्ठाद्द
क्षिणाद्भगवानृषिः ब्रह्मणः पृथिवीपाल शांतात्मा सुमहातपाः १० वामादजायतांगुष्ठाद्भार्या तस्य महात्मनः
तस्यां पंचाशतं कन्याः स एवाजनयन्मुनिः १२ ताः सर्वास्त्वनवद्यांग्यः कन्याः कमललोचनाः पुत्रिकाः स्था
पयामास नष्टपुत्रः प्रजापतिः १२ ददौ स दश धर्माय सप्तविंशतिमिंदवे दिव्येन विधिना राजन्कश्यपाय त्रयोद
श १३ नामतो धर्मपत्न्यस्ताः कीर्त्यमानानि बोध मे कीर्तिर्लक्ष्मीर्धृतिर्मेधा पुष्टिः श्रद्धा क्रिया तथा १४ बुद्धिर्ल
ज्जा मतिश्चैव पत्न्यो धर्मस्य ता दश द्वाराण्येतानि धर्मस्य विहितानि स्वयंभुवा १५ सप्तविंशति सोमस्य पत्न्यो लोक
सविश्रुताः कालस्य नयने युक्ताः सोमपत्न्यः शुचिव्रताः १६ ॥

द्वाराणि धर्मप्रवेशमार्गाः १५ नयने ज्ञापने १६ श्रीकृष्णो जयति ॥ ॥ ॥ छ ॥ ॥ ॥

आः
१३३

नक्षत्रयोगिन्यो नक्षत्रनामसुक्ताः विधावतः विधानार्थमभवन् पितामहोद्देवो धर्मः पितामहस्तनाङ्गानत्वात्तस्य पितानाम्नोहस्य पुत्रो दक्षः
तदंगुष्ठाङ्गजातत्वात्तस्य संबंधिनी वसुनाम्नी कन्या तस्यां धर्माद्वह्वोष्टौ जाता इत्यर्थः वसोस्तु वसवः पुत्रा इत्यन्वयः १७ १८ धूम्राया

सर्वनक्षत्रयोगिन्यो लोकयात्राविधानतः पैतामहो मनुर्देवस्तस्य पुत्रः प्रजापतिः तस्याष्टौ वसवः पुत्रास्तेषां व
क्ष्यामि विस्तरं १७ धरो ध्रुवश्च सोमश्च अहश्चैवानिलोऽनलः प्रत्यूषश्च प्रभासश्च वसवोऽष्टौ विनिश्रुताः १८
धूम्रायास्तु धरः पुत्रो ब्रह्मविद्यो ध्रुवस्तथा चंद्रमास्तु मनस्विन्याः श्वासायाः श्वसनस्तथा १९ रतायाश्चाप्यहः
पुत्रः शांडिल्याश्च हुताशनः प्रत्यूषश्च प्रभासश्च प्रभातायाः सुतौ स्मृतौ २० धरस्य पुत्रो द्रविणो हुतहव्यवहस्तथा
ध्रुवस्य पुत्रो द्रविणो हुतहव्यवहस्तथा २२ अह्नः सुतस्तथा ज्योतिः शमः शांतस्तथा मुनिः अग्नेः पुत्रः कुमारस्तु
श्रीमाञ्छरवणालयः २३ तस्य शाखो विशाखश्च नैगमेयश्च पृष्ठजः कृत्तिकाभ्युपपन्नश्च कार्त्तिकेय इति
स्मृतः २४ अनिलस्य शिवा भार्या तस्याः पुत्रो मनोजवः अविज्ञातगतिश्चैव द्वौ पुत्रावनिलस्य तु २५ प्रत्यूषस्य
विदुः पुत्रमृषिं नाम्नाथ देवलं द्वौ पुत्रौ देवलस्यापि क्षमावन्तौ मनीषिणौ बृहस्पतेस्तु भगिनी वरस्त्री ब्रह्मवादिनी
२६ योगसक्ता जगत्कृत्स्नमसक्ता विचचारह प्रभासस्य तु भार्या सा वसूनामष्टमस्य ह २७ विश्वकर्मा महाभा
गो जज्ञे शिल्पप्रजापतिः कर्ता शिल्पसहस्राणां त्रिदशानां च वार्द्धकिः २८ ॥ ॥ ॥ ॥ ॥

इति वसोरेव धूम्रादीनि नामांतराणि कल्पभेदात् अन्याः एताः न दक्षकन्या इति वा १९ २३ कृत्तिकानां षण्णां मातृत्वेनाभ्युपपन्नेऽङ्गी
कार्यात २४ २८

रामः
१३३

३१ त्रय इत्यत्र धर्मसंतानानां सर्वेषां नामान्यन्वर्थकानि ३२ ३४ वडवात्वश्वा अन्तरिक्षे अश्विनाव स्तनासिकया शुक्रप्रक्षेपात् ३५

भूषणानांच सर्वेषांकर्त्ता शिल्पवतांवरः यो दिव्यानि विमानानि त्रिदशानां चकार ह २९ मनुष्याश्चोपजीवंति यस्य शिल्पं
महात्मनः पूजयंति च यं नित्यं विश्वकर्माणमव्ययं ३० स्तनं तु दक्षिणं भित्वा ब्रह्मणो नरविग्रहः निःसृतो भगवान्धर्मः स
र्वलोकसुखावहः ३१ त्रयस्तस्य वराः पुत्राः सर्वभूतमनोहराः शमः कामश्च हर्षश्च तेजसा लोकधारिणः ३२ कामस्य तु
रतिर्भार्या शमस्य प्राप्तिरंगना नंदी तु भार्या हर्षस्य यासु लोकाः प्रतिष्ठिताः ३३ मरीचेः कश्यपः पुत्रः कश्यपस्य सुरासुराः ज
ज्ञिरे नृपशार्दूल लोकानां प्रभवस्तु सः ३४ त्वाष्ट्री तु सवितुर्भार्या वडवारूपधारिणी असूयत महाभागा सांतरिक्षे श्विना
वुभौ ३५ द्वादशैवादितेः पुत्राः शक्रमुख्या नराधिप तेषामवरजो विष्णुर्यत्र लोकाः प्रतिष्ठिताः ३६ त्रयस्त्रिंशत इत्ये
ते देवास्तेषामहं तव अन्वयं संप्रवक्ष्यामि पक्षैश्च कुलतो गणान् ३७ रुद्राणामपरः पक्षः साध्यानां मरुतां तथा व
सूनां भार्गवं विद्याद्विश्वेदेवांस्तथैव च ३८ वैनतेयस्तु गरुडो बलवानरुणस्तथा बृहस्पतिश्च भगवानादित्येष्वेव ग
ण्यते ३९ अश्विनौ गुह्यकान्विद्धि सर्वौषध्यस्तथा पशून् एते देवगणा राजन्कीर्तितास्तेनुपूर्वशः ४० यान्की
र्तयित्वा मनुजः सर्वपापैः प्रमुच्यते ब्रह्मणो हृदयं भित्वा निःसृतो भगवान्भृगुः ४१ भृगोः पुत्रः कविर्विद्वांश्शुक्रः क
विसुतो ग्रहः त्रैलोक्यप्राणयात्रार्थं वर्षावर्षे भयाभये ४२

३६ त्रयस्त्रिंशत इत्येते वसवः एकादश रुद्रा द्वादशादित्याः प्रजापतिश्च वषट्कारश्च ३७ ४१ शुक्रो ग्रहः लोकानां प्राणयात्रायां
वर्षावर्षी द्विकार्यमिति युक्तः ४२ ॥

श्रा: १३४ योगाचार्यइतिचापीव्यसौसुराणामपिचगुरुरितिसंबंधःदेवानांगुरुरेवयोगाचार्योयोगबलेनाकायद्वयंकृत्वादेवानामप्याचार्योभवदित्यर्थः

स्वयंभुवाभिसृष्टः स भुवंपरिधावति योगाचार्योमहाबुद्धिर्दैत्यानामभवद्गुरुः सुराणांचापिमेधावीब्रह्मचारीयतव्रतः ४३
तस्मिन्निसृष्टेविधिनायोगक्षेमायभार्गवे आत्मसुमादयामासपुत्रंभृगुरनिंदितं ४४ च्यवनंदीप्ततपसंधर्मात्मानंयश
स्विनं यःसरोषाच्च्युतोगर्भान्मातुर्मोक्षायभारत ४५ आरुषीतुमनोःकन्यातस्यपत्नीमनीषिणः और्वस्तस्यांसमभ
वदूरुंभित्वामहायशाः ४६ महातेजामहावीर्योबालएवगुणैर्युतः ऋचीकस्तस्यपुत्रस्तुजमदग्निस्ततोभवत् ४७
जमदग्नेस्तुचत्वारआसन्पुत्रामहात्मनः रामस्तेषांजघन्योभूदजघन्यैर्गुणैर्युतः ४८ सर्वशस्त्रेषुकुशलःक्ष
त्रियांतकरोवशी और्वस्यासीत्सुतशतंजामदग्न्यपुरोगमं तेषांपुत्रसहस्राणिबभूवुर्भुविविस्तरः ४९ ॥

तथाचमैत्रायणीयेसमाम्नातंबृहस्पतिर्हिभृगुक्तोमन्त्रैरंतरूपाभयामासुरेभ्यःक्षयायेमामविद्यामसृजदिति ४३ ४९ ॥ ॥ ॥ राम० १३४

विधाता२

धर्मप्रधानाद्दृष्टिरक्ताऽयाधर्मप्रधानांविवक्षुस्तत्रश्रोतॄणामनादरानित्यत्वंप्रभृत्यसाधारणीं सृष्टिंमध्येप्राहद्वावितियपोर्लक्षणंलो
केनिषत्तितोऽन्योधर्मोधर्ममयान्कार्मास्तेऽउदासीनौब्रह्मणःपुत्रौयौधाताचेतिसंज्ञौवंतौमनुनासहनित्यहिपनावितियोजनाऽस्मत
त्रप्रक्रियावृत्तितस्यचिदाभासावुभौव्याप्नुवंतौघटंतत्राज्ञानंधियानश्यदाभासेनघटःस्फुरति।अस्यार्थः।यथादीपप्रभाचक्षुर्भ्यांसुगम
छद्यौव्याप्तेतत्रप्रभयाघटावरकंतमोनश्यतिचक्षुषाघटःप्रकाशतेतद्वद्वृत्तितस्यचिदाभासाभ्यांघटाज्ञाननाशघटस्फुरणेत्रि

द्वौपुत्रौब्रह्मणाल्लब्धौयुयोर्लिप्तिषतिलक्षणं लोके
धाताविधाताचयौस्थितौमनुनासह ५० ॥ ॥

कृ२

धात

येत्नेरतितेऽत्रज्ञमानविधात्संज्ञेनयोर्लक्षणंज्ञास्फुरणात्मकंलोकेदृश्यतेयोघटःस्फुरतिघटइतिस्फुरणाज्ञहर्षविषादयोर्मनाज्ञी
वामनुःतेनसहनित्यसंबद्धौधातारौसुषुप्तावपिसूक्ष्मवृत्तिस्फुरणयोःसत्वात्अानंदमभुंचेतोमुखइतिश्रुतेःसुखमहमस्वाप्समित्यनुभूत
सौषुप्तसुखपरामर्शाच्चातत्रभ्रसर्वदृश्यञ्जातंब्रह्मपुत्राभ्यांव्याप्तंब्रह्मैवतत्रदीपवदुदासीनोपिचिदात्माध्यासात्तद्दीपदोषाक्रांतोरागा
द्वेषादिमानिवभवतिविद्वांस्तुसर्वस्यचिद्विलासत्वंमत्वाऽधर्मादिकर्माद्यैरपिनोद्विजतेतिभावः ५० ॥ ॥ ॥ ॥

व्याः ९३५

ननु केयं विद्या यया सर्वं चिन्मात्रमित्येवं प्रपञ्चितं तस्याः कर्मजन्यत्वे उपासनाजन्यत्वे वा ऽनित्यत्वापत्तिः प्रकारान्तरस्य चासंभवादित्याशंक्याह

तयोरेवेति। यथा धीरस्फुररोग्रनाणपरं तत्रेन कर्तुं न कर्तुमन्यथा कर्तुं वा शक्येत तथैवैषं विद्येति सा दृश्यं तत्वमस्यादेवं न तु लक्ष्यते देवी यानस्नानाम्

ध्रुतत्वमयी त्वहं ब्रह्मास्मीति वाक्यजन्या धीवृत्तिः दशमस्त्वमसीति वाक्यजा वृत्तिर्दशमत्वमिव ब्रह्मभावं जीवस्यागोचरयन्ती लक्ष्मीः परब्रह्म

पलक्षकत्वात् पद्मगृहा हृदयगुहा यामेवस्फुरंती शुभावेधनिवर्तकत्वात् न चैवं वृत्तिविषयत्वे ब्रह्मणोऽनात्मत्वं घटादिवत् स्यादिति वाच्यं

वृत्तिव्याप्यत्वानंगीकारात् यथोक्तं फलव्याप्यत्वमेवास्य शास्त्रकृद्भिर्निराकृतं ब्रह्मण्यज्ञाननाशाय वृत्तिव्याप्तिरपेक्ष्यत इति। तथा च

व्याप्यत्वेपि फलं ५

तयोरेवसस्सारेदेवी लक्ष्मीः पद्मगृहा शुभा तस्याः कमानसाः पुत्रा ल्फरगा व्योमचारिणः ५९

वस्तुतत्त्वविषयिणी एवं विद्या अविद्योन्मूलिकानकर्मोपासनाभ्यां नाश्यादिति भावः अस्याः फलमाह तस्या इति। तस्याः विद्यायाः

पुत्रा इव पुत्राः [redacted]

फलानि मानसाः मनः संकल्पमात्रजन्याः पित्रादयः संकल्पादेवास्य पितरः समुत्तिष्ठंतीति श्रुतेः। अस्य हार्दब्रह्मविदः तुरगाः स

द्योमनः संहार्या एव पत्तो व्योमचारिणः व्योम्नि हार्दाकाशे चारिणः। य एवं वेदाहं ब्रह्मास्मीति स इदं सर्वं भवतीति श्रुतेर्ब्रह्मज्ञानात्

सार्वात्म्यं स्वीयमवगच्छतः सर्वप्राप्तिरित्यर्थः। तस्माद्धर्मप्रभवस्य शिष्य वरोपिन विज्ञानकायें सर्वस्य ब्रह्ममात्रत्वात् ५९ ॥ राम० ९३५